Shri Raghunatha Temple MSS. Library,
JAMMU

No. ३६८ घ

Title रघुवंशव्याख्या "संजीवनी" (३-४ सर्गौ)

Author मल्लिनाथ।

Extent २१ पत्र Age

Subject काव्य

© Dharmartha Trust J&K. Digitized by eGangotri

रघुवंशव्याख्या संजीवनीसमाख्या

तृतीयचतुर्थसर्गौ

२६८

© Dharmartha Trust J&K. Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥ उपाधिगमोप्यनुपाधिगम्यः समावृतो के [illegible] ॥ पिथा [illegible] नत्र [illegible] त्रिवोयं
जगत्य पायादपि नः सदा यान् ॥ १ ॥ गर्भिगर्भमाधत्तेत्युक्तं संप्रति [illegible] मल [illegible] ॥ निबध्नीयेतुं प्रस्तौति ॥ अथेति ॥ अ
अथ गर्भधारणानंतरं सुदक्षिणा उपस्थितोदयं प्राप्तकालं भर्तुर्दिलीपस्य [illegible] मनोरथं ॥ भावेनः ॥ पुनः
सखीजनस्याह्लादनानां दृष्टीनां कौमुदी मुखं चंद्रिकाप्रादुर्भावं ॥ यद्वा ॥ कौमुदी दीपोत्सवतिथिः ॥ तदु
क्तं भविष्योत्तरे ॥ कौ मोदंते जना यस्यां तेनासौ कौमुदी मतेति ॥ तस्या मुखं प्रारंभः ॥ अत एव केचित्कौमुदीम
हमिति पाठं पठंति ॥ इक्ष्वाकुकुलस्य संततेर्विच्छेदस्य [illegible] दानं [illegible] कारणं ॥ निदानं त्वादिकारणमित्यमरः ॥
एवंविधं दौहृदलक्षणं गर्भचिह्नं दधौ ॥ स्वहृदयेन गर्भहृदयेन च द्विहृदया [illegible] गर्भिणी ॥ यथाह वाह
डः ॥ मातृजं ह्यस्य हृदयं मातुश्च हृदयं च तत् ॥ संबद्धं तेन गर्भिण्याः श्रेष्ठं श्रद्धाभिमाननमिति ॥ तत्संबंधि
ला इच्छा दौहृदमित्युच्यते ॥ सा च तद्योगाद्दौहृदिनीति ॥ तदुक्तं संग्रहे ॥ द्विहृदयां नारीं दौहृदिनीमाच
क्षते तज्ज्ञा इति ॥ अत्र दौहृदलक्षणस्येप्सितत्वेन कौमुदीमुखत्वेन च निरूपणाद्रूपकालंकारः ॥ अस्मिन्सर्गे वंशस्थ
वृत्तं ॥ जतौ तु वंशस्थमुदीरितं जरौ ॥ १ ॥ संप्रति [illegible] मतास्त्वं गर्भ [illegible] वर्णयति ॥ शरीरेति ॥ शरीरस्य सादात्का
र्श्याद् असमग्रभूषणा परिमिताभरणा लोध्रपुष्पवत्पाण्डुना मुखेन [illegible] सा सुदक्षिणा [illegible] यामस्तारका
यस्यां सा तथोक्ता ॥ विरलनक्षत्रेत्यर्थः ॥ तनुप्रकाशेनाल्पकांतिना [illegible] ताईषदसमाप्तप्रभाता
प्रभातकल्पा प्रभातादीषन्न्यूना ॥ तमिस्रा दि [illegible] [illegible] प्रभातनराष्ट्रस्य [illegible] इव [illegible] ॥ शर्वरीवाभिरि

© Dharmartha Trust J&K. Digitized by eGangotri

व.लक्ष्त ॥ शरीरसादादिगर्भलक्षणे बाहडः ॥ क्षामता गरिमा अद्वेर्मे र्ष्टौ च्छर्दिरसो चकं ॥ ज्ञं प्राप्रसेकसदनं रो
मराज्याः प्रकाशनमिति ॥ २ ॥ तदिति ॥ क्षितिस्थिरसे रहसि मन्दासुर । निसृगं क्षितस्या श्रानंनंतदानन मुदक्षाणा
मुखं उप. घ्राय तृप्तिं नाययौ ॥ कः कथमिव ॥ शुचिव्यपायेयी भ्रावसाने । शुचिः शुद्धेनुपरतेश्शंगाराषाढ
योः सिते ॥ ग्रीष्मेद्भुतवहे पिस्यादुपधास्तुद्भुः मंत्रणीतिविश्वः ॥ पयोमुचां मेघानां पृषतैर्बिंदुभिः ॥ पृषंति
बिंदुपृषताइत्यमरः ॥ सिक्तमुक्षितं वनराज्याः पल्वलमुपाघ्राय करीगजइव । अत्र करिवनराजिपल्वलानां को
तकामिनीवदनसमाधिरनुसंधेयः ॥ गर्भिणीनां मृद्भक्षणं लोकेप्रसिद्धमेव । एतेन दोहदाख्यं गर्भलक्षणमुच्य
ते ॥ ३ ॥ दोहदलक्षणं मृद्भक्षणे हलंतरमुत्प्रेक्षते ॥ दिवामिति ॥ हियस्मात्हिंगं तविश्रांतरथस्य कवर्ती तस्याः
॥१॥ सुतस्तत्सुतो मरुत्वानिंद्रः ॥ इंद्रोमरुत्वान्मघवेत्यमरः ॥ दिवं स्वर्गमिव भुवं भोक्ष्यते ॥ तुङ्गोऽनवनइत्यात्म
नेपदं ॥ अतः प्रथमं मासुदक्षिणा तथाविधेमृ विकारमद्भुपे अभिलष्य तदित्यभिलाषो भोगपवस्तुतस्मि ॥१॥
न्नाकर्मणि घञ्प्रत्ययः ॥ रस्यंते स्वाद्यंत इति रसाः भोग्यार्थाः अन्येचतेरसाश्चतान् विलंघ्य विकल्पमनो
बबंध निदध्यौ ॥ दोहदहेतुकस्य मृद्भक्षणस्य पुत्रभूतो गस्य च नाथत्वमुत्प्रेक्षते ॥ ४ ॥ नेति ॥ मगधस्य
राज्ञोऽपत्यं स्त्री मागधी सुदक्षिणा ॥ द्व्यञ्मगधकलिंगसूरमसादणित्यण् ॥ स्पृहया किंचित्किमपीप्सितमि
ष्टमेमहं न ब्रवीति नाचष्टे ॥ केषु वस्तुषु स्पृहावतीत्यनुवेलमनुक्षणमादृतः आदृतवान् कर्तरिक्तः
आदृतौ सादरावचिंतावित्यमरः ॥ प्रियायाः सखीः सहचरीः [illegible] दिलीपः पृच्छतिस्म पप्रच्छ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

लरम्भूतार्थे। लरस्मेदृत्यनेन। सर्वीनां विस्रंभमभिलादिति भावः॥ ५॥ उपेत्येति। दोहदं गर्भिणीमनोरथः॥ दोहदं
दोहदं स्वाद्धालालसं च समस्मतमिति हलायुधः। सा सुदक्षिणा दोहदेन गर्भिणीमनोरथेन दुःखशीलतां दुः
खस्वभावतामुपेत्य प्राप्य यदेव स्तवव्रे आचकाङ्क्ष तदाहृतमानीतं मैत्रेतिशेषः॥ अपश्यदेव अलभततेत्यर्थः॥।
कुतो हि यस्मादस्य भूपतेरिष्टं वस्तु त्रिदिवे स्वर्गेऽपि अनासाद्यमनवाप्यं नाभूत्॥ किंभूतस्यानेत्याह ॥
अधिज्यधन्वन इति। नहि वीरपत्नीनामलभ्यं नाम किंचिदस्तीति भावः॥ अत्र बाहडः॥ यां दृष्ट्वा भाविदोहं
तेऽश्रद्धा च विविधाभिके ति॥ एतत्तु पत्नीमनोरथपूरणाकरणादृष्टदोषसंभवान्न तु राजः। स्त्रीलौल्यात्तथात
दुक्तं॥ देयमप्यहितं तस्यै हितायाहितमल्पकं॥ श्रद्धाविघातेन गर्भस्य विकृतिश्च्युतिरेव च॥ अन्यत्र च॥ दोह
दस्याप्रमादेन गर्भो दोषमवाप्नुयादिति॥ ६॥ क्रमेणेति॥ सा सुदक्षिणा क्रमेण दोहदव्यथां च निस्तीर्य प्रची
यमानावयवा पुष्यमाणावयवा सती पुराणपत्रापगमादनन्तरं सन्नद्धाः सज्जा ताः मनोज्ञाः प्रत्यग्राः
पल्लवा यस्याः सा लतेव रराज॥ ७॥ लक्षणान्तरं वर्णयति॥ दिनेष्विति॥ दिनेषु दोहददिवसेषु गच्छत्सु नितां
तपीवरमतिस्थूलमासमन्तान्नीलमुखं चूचकं यस्य तत्तदीयं स्तनद्वयं भ्रमरैरभिलीनयोराश्लिष्टयोः सु
जातयोः सुन्दरयोः पंकजकोशयोः पद्ममुकुलयोः श्रियं तिरश्चकार॥ अत्र बाहडः॥ आश्लेष्टतास्तनौ
पीनौ श्यामतान्योष्ठचूचकाविति॥ ८॥ निधानेति॥ नृपः ससत्त्वां आपन्नसत्त्वां गर्भिणीमित्यर्थः॥ आप
न्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गुर्विणीत्यमरः॥ महिषीं। निधानं निधिर्गर्भे यस्याः सा तां सागराम्बरां समुद्र

© Dharmartha Trust J&K. Digitized by eGangotri

वसुमतीं भूमिमित्यर्थः ॥ भूतधात्री रत्नगर्भा विपुला सागरांबरेत्यमरः ॥ शमीमिवाभ्यंतरलीनपावकां अस्याः स्तं
शमीमिव । शमीतरोर्वह्निरस्तीत्यत्र लिंगं ॥ शमीगर्भादग्निं मथ्नातीति ॥ अंतःसलिलामंतर्गतजलां सरस्व
तीं नदीमिव चक्षुमन्यत ॥ एतेन गर्भस्य भाग्यवत्वतेजस्वित्वपावनत्वानि विवक्षितानि ॥ ९ ॥ प्रियेति ॥ धी
रः स राजा प्रियायामनुरागस्य स्नेहस्य मनसः समुन्नतेरौदार्यस्य भुजेन भुजबलेनार्जितानां करेण वाणि
ज्यादिना वा । दिगंतेषु संपदां ध्यातेः पुत्रो भविष्यतीति [illegible] प्रमचे ॥ क्षितियोगांतरे धैर्ये धारणारतिनुष्वि
तिविस्थः ॥ सदृशीरनुरूपाः पुमान् सूयतेऽनेनेति पुंसवनं [illegible] क्रियाः [illegible] यथाक्रमं क्रममनतिक्र
म्य धन्वी तत्स्तवान् ॥ आदिशब्देन अनवलोभनसीमंतोन्नयनेग्रहः ॥ अत्र मासि द्वितीये तृतीये वा पुंसवनं ॥
॥२॥ यदाह । पुंसानक्षत्रेण चंद्रमायुक्तः स्यादिति पारस्करः ॥ चतुर्थेऽनवलोभनं मितपाश्वलाघनः ॥ षष्ठेऽष्टमे वा ॥२॥
सीमंत इति याज्ञवल्क्यः ॥ १० ॥ सुरेंद्र मात्रेति ॥ गृहागतो नृपः सुरेंद्राणां लोकपालानां मात्राः निरंशैराश्रि
तस्यानुप्रविष्टस्य गर्भस्य गौरवात् प्रयत्नेन मुक्तासनया आसनादुत्थितयेत्यर्थः ॥ उपचारस्यांजलावंज
लिकरणे खिन्नहस्तया पारिप्लवनेत्रया तरलाक्ष्या । चंचलं तरलं चैव पारिप्लवपरिप्लवे इत्यमरः ॥ तया सुद
क्षिणया ननंद ॥ सुरेंद्रमात्राश्रितेत्यत्र मनुः ॥ अष्टाभिर्लोकपालानां मात्राभिर्निर्मितो नृप इति ॥ ११ ॥ कुमारे
ति ॥ अथ कुमारस्य भृत्या बालचिकित्सा ॥ संज्ञायां समजनिषदेत्यादिना क्यप् ॥ तस्यां कुशलैः कृतिभिः कृती
अभ्यालइत्यपीत्यमरः ॥ आप्तैर्हितैर्भिषग्भिर्वैद्यैः ॥ भिषग्वैद्यौ चिकित्सक इत्यमरः ॥ गर्भस्य भर्मणि भरणेण

© Dharmartha Trust J&K. Digitized by eGangotri

षणे।। गर्भे हे गर्भः तिष्ठेमेति शाश्वतः।। गर्भो गर्भनि चप्रत्ययः। अनुष्ठिते तस्मिन्ते सति काले दशमे मासि अन्यत्र ग्रीष्मा
वसाने प्रसवस्य गर्भमोचनस्यानुरूपो मासः प्रसवमित्यर्थः। स्यादुत्पादे फलेपुष्पे प्रसवो गर्भमोचने त्वित्य
मरः।। श्रियां मायां अत्राण्यपत्याः संजातान्यस्यां दृशिता।। तदस्य संजातं तारकादिभ्य इतच् इतीतच्प्रत्ययः।। तो दिवमिवप
तिर्भर्त्ता प्रतीतो हृष्टः सन्। स्यात्ते हृष्टः प्रतीत इत्यमरः।। हृष्टहृष्टवान्।। गर्भेऽमर्मणीति पाठे गर्भाधान प्रतीतावो
चित्यमंगः।।२२।। ग्रहैरिति।। ततः शच्याः इन्द्राण्याः समा। पुलोमजा शचीन्द्राणीत्यमरः।। सा सुदक्षिणा।। समये प्रसूति
काले सति दशमे मासीत्यर्थः। दशमे मासि जायत इति श्रुतेः। उच्चसंश्रयैः उच्चसंस्थैः स्वतुंगस्थानगैः सूर्यैर्ग्रहैरनस्त
मितैः। केश्चिद्ग्रहास्संभवं पंचभिर्ग्रहैः सूचिता भाग्यसंपद्यस्य तं पुत्रं। त्रीणि प्रभावमंत्रोत्साहात्मकानि साधना
न्युत्पादकानि यस्याः सा त्रिसाधना शक्तिः। शक्तयस्तिस्रः प्रभावोत्साहमंत्रजा इत्यमरः। अक्षय्यमर्थमिव असू
त। षूङ् प्राणिगर्भविमोचने। सूत्यदाषुपद्यते। तस्मात्क्तः कर्तरि लङ्।। अत्रेदमनुसंधेयं।। अजवृषभमृ
गांगनाकुलीरा झषवणिजौ च दिवाकरादितुंगाः।। दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभि
श्च तेऽस्तनीचाः।। इति सूर्यादीनां सप्तानां ग्रहाणां मेषवृषभादयो राशयः श्लोकोक्तक्रमविशिष्टाः उच्चस्थाना
२ख नीति स्वतुंगापेक्षया सप्तमस्थानानि नीचानि तत्रोच्चेष्वपि दशमादयो राशित्रिंशांशा यथाक्रममुच्चेषु परमो
च्चानि नीचेषु परमनीचा इति ज्ञातव्यं तत्र श्लोकः कार्यः।। अत्रांशास्त्रिंशो भागः। यथाह नारदः।। त्रिंशद्भागात्मकं लग्न
मिति। सूर्यप्रत्यासन्ने ग्रहाणामस्तमयो नाम। तदुक्तं लघुमानसे।। रविणास्तमयो योगो वियोगस्तूदयो म

© Dharmartha Trust J&K. Digitized by eGangotri

वेदिति। तेच[illegible]च्चस्थाः फलंति अस्तगा नापि नीचगाः॥ तदुक्तं। राजमृगांके॥ स्वोच्चे पूर्णं स्वर्क्षमर्द्धं सुहृद्देहपादं द्विड्देहल्पं
शुभं खेचरेंद्रः॥ नीचस्थायी नास्तगो वा न किंचित्यादृश्यं न सत्त्रिकोणे ददातीति॥ तदिदमाह कविः॥ उच्चसंस्थैर
सूर्यगैरिति च॥ एवं सति यस्य जन्मकाले पंच प्रभृतयो ग्रहाः स्वोच्चस्थाः स देवतुल्यो भवति॥ तदुक्तं क्रूरस्थीये॥
सुखिनः प्रकृष्टकार्या राजप्रतिरूपकाश्च राजान एकद्वित्रिचतुर्भिर्ज्ञेयंते। अतःपरं दिव्या इति॥ तदिदमाह पंच
भिरिति॥ १३॥ दिश इति॥ तस्मिन् क्षणे तस्मिन्नवसरे॥ कालाध्वनोरत्यंतसंयोगे द्वितीया॥ दिशः प्रसेदुः प्रसन्ना बभूवुः॥
मरुतो वाताः सुखाः मनोहराः ववुः॥ अग्निः प्रदक्षिणार्चिः सन् हविराददे स्वीचकार॥ तत्क्षणं सर्वं शुभशंसि शुभसूचकं
बभूव। तथाहि॥ तादृशां रघुप्रकाराणां भवो जन्म लोकाभ्युदयाय भवतीति शेषः॥ ततो देवा अपि संतुष्टा इत्यर्थः॥
॥१४॥ अरिष्टेति॥ अरिष्टं सूतिकागृहं अत्र ते प्रतियोगेषु दृश्यत इति द्वितीया॥ विचारिणा सुजन्मनः शोभनोत्पत्तेः
॥३॥ जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भव इत्यमरः॥ तस्य शिशोर्निजेन नैसर्गिकेण तेजसा सहसा हतत्विषः हि ॥३॥
णकांतयो निशीथदीपाः अर्धरात्रप्रदीपाः॥ रात्र्यर्धाः सुप्तिः अर्धरात्रनिशीथौ द्वावित्यमरः॥ आलेख्ये
चित्रे समर्पिता लिखिता इव बभूवुः॥ निशीथग्रहणं दीपानां प्रभाधिक्यसंभावनार्थं॥ १५॥ जनायेति॥ नृपतेर्दि
लीपस्य अमृतसमिताक्षरं अमृतसमानाक्षरं॥ सरूपसमितसमिता इत्याह दंडी॥ कुमारजन्मपुत्रोत्पत्तिं शं
सते कथयते शुद्धांतचराय अंतःपुरचारिणे जनाय त्रयमेवादेयमासीत्॥ किं तत्॥ शशिप्रभमुज्ज्वलं छत्रं॥
उभे चामरे च॥ छत्रादीनां राज्ञः प्रधानांगत्वादिति भावः॥ १६॥ निवातेति॥ निवातो निर्वातप्रदेशाः॥ निवाता

© Dharmartha Trust J&K. Digitized by eGangotri

वाश्रया वाता वितमरः॥ तत्र प्रत्यक्षं तं ह तत्स्तिमितेन निष्पंदेन चक्षुषा नेत्रेण कांतं सुंदरं सुतानं नं पुत्रमुखं पि
बतस्तस्य याप्युत्तानपस्य गुरू रूपाद ; प्रहर्षः कर्त्ता॥ इंदुं दर्शनाद्दुरूर्मिहोदधेः पूरोजलौघ इव। आत्मनि शरी
रे न प्रबभूव स्यातुं न शशाक। अंतर्न माति स्मेतियावत्। नह्यल्पाधारेऽधिकं मीयत इति भावः॥ यद्वा। हर्ष आत्म
नि स्वस्मिन्विषये न प्रबभूव। स्यातुं न शशाक। बहिर्निर्जगामेत्यर्थः॥ १७॥ स इति॥ स दिलीपसूनुः तपस्विना पु
रोधसा पुरोहितेन। पुरोधास्तु पुरोहित इत्यमरः। वसिष्ठेन॥ तपस्वित्वात्तदनुष्ठितं कर्म सवीर्यं स्यादिति भावः॥
तपोवनादेत्यागतस्य अखिलं समग्रं जातकर्म जातस्य कर्तव्यसंस्कारविशेषमेतं सति॥ प्रयुक्तः संकारः
शाणोल्लेखनादिर्यस्य स तथोक्तः॥ आकरोद्भवः खनिप्रभवः॥ खनिः स्त्रियामाकरः स्यादित्यमरः॥ मणिरिवा
धिकं बभौ॥ वसिष्ठमंत्रप्रभावात्तेजिष्ठोऽभूदित्यर्थः॥ अत्र मनुः॥ प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म विधीय
त इति॥ १८॥ सुखश्रवा इति॥ सुखः सुखकरः श्रवः श्रवणं येषां ते सुखश्रवाः श्रुतिसुखा इत्यर्थः॥ मंगल
तूर्यनिस्वना मंगलवाद्यध्वनयो वारयोषितां वेश्यानां। वारस्त्री गणिका वेश्या रूपाजीवेत्यमरः॥ प्रमोदन
त्तैर्हर्षनर्तनैः सह मागधीपतेर्दिलीपस्य सद्मनि केवलं गृहे एव न व्यजृंभंत किंतु घोरा कोयेषां ते दिवौकसः॥
एषां दशादित्यादिसाधुः। देवास्तेषां पथ्यपि व्यजृंभंत। तस्य देवांशत्वाद्देवोपकारित्वाच्च देवदुंदुभयोऽ
पि नेदुरिति भावः॥ १९॥ नेति॥ रक्षितुः सम्यक्पालनशीलस्य तस्य दिलीपस्य अत एव चौराद्यभावात् संयतो
बद्धो न बभूव यन्नात्तत्॥ किं तेनात आह। विसर्जयेदिति। सुतजन्मना हर्षितस्तोषितः सन्नयं बद्धं विसर्जये
द्धि मोचयेत्॥ किंतु। स राजा तदा पितॄणां ऋणात्। निधानाद्बंधनात्केवलं यथा तथा स्वयमेव एक एवेत्यर्थः॥

© Dharmartha Trust J&K. Digitized by eGangotri

केवलः। कृत्स्न एककृत्स्नकेवलश्चावधारितइति विश्वः॥ मुमुचे॥ कर्मकर्त्तरि लिट्। स्वयमेव मुक्त इत्यर्थः॥ अमि
त्रार्थ एष वा अत्रन्नणीयः उत्तीतिश्रुतिः प्रमाणं॥२०॥ श्रुतस्येति॥ अर्थे विकृष्टार्थज्ञः पार्थिवः पृथिवीश्वरो दि
लीपः अयमर्भको बालकः श्रुतस्य शास्त्रस्यान्तं पारं यायात् तथा युधि परेषां शत्रूणामन्तं पारं च यायात्॥
गच्छेदित्यर्थः। आकिलिङ्क्षितिआशीर्वादार्थे लिङ्। इति हेतोरुत्तोः। अगिलिधिगत्यर्थात् तिलधिधातोर्गमना रघि ४
र्थमर्थमर्थविदा देवज्ञा लोचना आत्मसंभवं पुत्रं नाम्ना रघुं चकार। लघिबंघिगतौ मेलोपश्च तु ऋत्यये पालम्ह
५ लल घुवलांगुलीनां च लोरलमापद्यतइति वैकल्पिके रेफादेशे रघुरिति रूपं सिद्धं॥ अत्र श्लोकः॥ आत्रो
चेतुर्व्यति क्रान्तेनामकर्म विधीयतइति॥२१॥ पितुरिति॥ समग्रसंपदः पूर्ण[illegible]लक्ष्मीकस्य पितुर्दिलीपस्याप्र
मनोज्ञस्तु नैमनोहरैः अवयवैः हरिदश्वदीधितेः सूर्यस्य रश्मेः॥ भो स्वदिवसस [illegible] हरिदश्वो
॥४॥ [illegible]त्यमरः। अनुप्रवेशात् बालचन्द्रमा इव दिने दिने प्रतिदिनं॥ नित्यवीप्सयोरिति द्विर्व
चनं॥ वृद्धिं पुपोष। अत्र संहितावचनं। सलिलमये [illegible] निरवे। दीधितयो मयूखाः [illegible]॥ उपमेयं ॥६॥
ति दर्पणोदरनिहिताः इव मंदिरस्यां तरिति॥२२॥ उमेति॥ उमा वृषांको पार्वतीवृषध्वजौ [illegible] नाका
तिकेयेन। कार्तिकेयो महासेनः शरजन्मा षडाननइत्यमरः॥ यथानंदतुः। शचीपुरंदरौ इन्द्राणी
[illegible] लोमजाया चेन्द्राणीत्यमरः॥ जयन्तेन पाकशासनिना। जयन्तः पाकशासनिरित्यमरः॥ यथानंद
तुः। तथा तत्समातात्तस्यामुमावृषांकाभ्यां शचीपुरंदराभ्यां च समो मागधीनन्दप[illegible] तत्सदृशेन तास्यां
कुमारजयन्ताभ्यां रघ्वशेन सुतेन [illegible] ननंदतुः॥ मागधी [illegible]रख्याता॥२३॥ रघ्यांगनाम्नोरिति॥ रथ्यां

© Dharmartha Trust J&K. Digitized by eGangotri

गनाम्नी चरथांगनामा चरथांगनामानौ चक्रवाकौ ॥ उभानू स्त्रियेत्येकशेषः । तयोरिव । तयोर्दम्पत्योर्भावबंधनं हृ
दयावकर्षकंबधपरस्परानुरागः अन्योन्यविषयं यत्प्रेम वा हृवतदेकेन केवलेन तान्यामन्येन वा ॥ एके मुख्यान्यकं
वलाः स्त्यमरः ॥ सुतेन विभक्तमपि न्नतविभागमपि परस्पराश्रया परिपर्यचीयत । वृद्धि मे । कर्मकर्तरि लिट् ॥
अत्रत्रिमल्लान्वयमेव उपचितमित्यर्थः । पदेकाधारं वस्कतदाधारद्वये विभज्यमानं हीयते । अत्रतु तयोर्विष
मभागेक विषयं प्रेम संप्रति द्वितीयलाभेऽपि ना हीयत प्रत्युतोपचितमेव अभूदिति भावः ॥ २४ ॥ उवाचेति ॥ सोऽ
र्भकः शिशुः । पोतः पाकोऽर्भको डिंभः पृथुकः शावकः शिशुरित्यमरः । धात्र्या उपमात्रा । धात्री जनन्यामलकीव
सुमन्युपमात्‌षुिति विश्वः । प्रथमं मुदितमुपदिष्टं वचनवाच ॥ तदीयामंगुलिमवलंब्य ययौ ॥ प्रणिपातस्य शि
शिक्षया उपदेशेन ननम्रोऽभूच्चेति यत्न ॥ तेन पितुर्मुदं ततान ॥ २५ ॥ तमिति ॥ शरीरस्पर्शोऽगजेः सुखैः त्वचि त्वगिंद्रिये
अमृतं निषिंचंतमिव तं पुत्रमंकमारोप्य मुदाविर्भावात् उपांतयोः संमीलितलोचनः सन्नृपः चिरात्सुतस्पर्श
रसज्ञतां ययौ ॥ रसः स्वादः ॥ २६ ॥ अमंस्तेति ॥ स्थितेरभेत्ता मर्यादापालकः सन्नृपः परार्ध्यजन्मनात्युत्कृष्टजन्म
नातेन रघुणा अन्वयं वंशं प्रजानां पतिर्ब्रह्मा गुणाः सत्वादयः ॥ गुणाः सत्वं रजस्तम इत्यमरः । तेषु अग्रेण
मुख्येन सत्वेन वर्तते या प्रियतनुर्त्रिगुणाग्र वतीर्णेन स्वस्वरूपमूर्तिभेदेन अवतारविशेषणा विष्णुना आत्मनः
सर्गस्य सृष्टिमिव स्थितिमंतं प्रहिणावतं अमंस्त ॥ मन्पतेरनुदात्तत्वादिटः प्रतिषेधः ॥ अत्रोपमानोपमेययोरि
तरेतरविशेषणानीतरेतरत्रयोज्यानि ॥ तत्र रघुपक्षे गुणा विद्याविनयादयः ॥ गुणाः प्रधाने रूपादौ मौ

© Dharmartha Trust J&K. Digitized by eGangotri

र्णो रुद्रदेवकोदरे॥ स्तंभेसत्वादि संध्यादि विद्यादि हरितादृष्टि स्थितिविश्वः॥ शेषं सुगमं॥२७॥ सिति॥ चूडाकार्या द्वि
जातीनां सर्वेषामेव धर्मतः॥ प्रथमे ऽब्दे तृतीये वा कर्तव्या श्रुतिचोदनादितिमनुस्मरणात्॥ तृतीयवर्षे कृतचू
लः निष्पन्नचूडाकर्मा सन्कुंडलयोरभेदः॥ सुधुः॥ धात्रेपंचमेवर्षे विद्यारंभं च कारयेदितिवचनात्पंचमेवर्षे
चलकाकपक्षकेश्च चलत्रिशिखंडकेः॥ बालानां तु शिखाप्रोक्ता काकपक्षः शिखंडक इति हलायुधः॥ सव
योभिः स्निग्धैः वयस्यः स्निग्धः सवयाः इत्यमरः॥ अमात्यपुत्रैरन्वितः सन् लिपेः पंचाशद्वर्णात्मिकायामातृ
5 कायायथावद्ग्रहणेन सम्यग्बोधेनोपायभूतेन वाङ्मयं शास्त्रजातं नद्यामुखं द्वारं। मुखं वदने मुख्यारंभे द्वा
र उपाययोरिति यादवः॥ तेन कश्चिन्मकरादिः समुद्रमिवाविशत्॥ प्रविशति स्म वा नित्यपर्यायः॥२८॥ अथेति॥
गर्भाष्टमे प्रकुर्वीत ब्राह्मणस्योपनायनं॥ गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विश इतिमनुस्मरणात॥ अथ ॥५॥
॥५॥ गर्भैकादशे ऽब्दे विधिवदुपनीतं कृतोपवीतं गुरुप्रियमेनं रघुं विपश्चितो विद्वांसो गुरवो विनिन्युः शिक्षि
तवंतः॥ ते गुरवः किं सोपायकर्मस्विति यादवः॥ वस्तुनि पात्रभूते उपहिता प्रयुक्ता प्रसीदति फलतीति॥ क्रिया ल ५
हि कृत्यं विनयति नाट्य मितिकौटिल्यः॥२९॥ धियइति॥ अत्र कामंदकः॥ शुश्रूषा श्रवणं चैव ग्रहणं
धारणं तथा॥ ऊहापोहार्थविज्ञानं तत्वज्ञानं च धीगुणा इति॥ आन्वीक्षिकी त्रयी वार्ता दंडनीतिश्च शा
श्वती॥ एता विद्याश्चतस्रस्तु लोकसंस्थितिहेतवः॥ उदारधीरुत्कृष्टबुद्धिः सरघुः समग्रैर्धियो गुणैः
चत्वारोऽर्णवा उपमा उपमानं यासां ताश्चतुरर्णवोपमाः॥ तद्विता यो त्तरपदसमाहार इति उत्तरप

रि

© Dharmartha Trust J&K. Digitized by eGangotri

इसमासः ॥ चतस्रो विघाः हरितां दिशामीश्वरः सूर्यः पवनातिपातिभिर्हरिद्भिर्निजाश्वैः ॥ हरित्ककुभि वर्णे
च तृणे वाजिविशेषयोरिति विश्वः ॥ चतस्रो दिश इव क्रमात्ततार ॥ चतुरर्णवोपमत्वं दिशामिति द्रष्टव्यं ॥
॥३०॥ त्वचमिति ॥ कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः ॥ वसीरन्नानुपूर्वेण शाणक्षौमाविकानि
चेति मनुस्मरणात् ॥ मेखलां मुञ्जां रौरवीं रुरुसंबंधिनीं ॥ रुरुर्मेसाच्छस्मसारङ्ग इति यादवः ॥ त्वचं चर्म परिधा
य वसितां मंत्रवत्समंत्रकमस्त्रं आग्नेयादिकं पितुरेवोपाध्यायाः दक्षिणावतश्चाप्यस्तवान् ॥ आख्यातोपयोग
इत्यपादानसंज्ञा ॥ पितुरेवेत्यवधारणमुपपादयति ॥ नेति ॥ तद्गुरुरेकोऽद्वितीयः पार्थिवः केवलं पृथिवी
श्वर एव नाभूत् ॥ किंतु ॥ क्षितौ स दिलीप एकधनुर्द्धरोप्यभूत् ॥३१॥ महोक्षतामिति ॥ रघुः क्रमाद्यौवनेन
भिन्नशैशवो निरस्तशिशुभावः सन्महोक्षतां महोक्षो महर्षभः ॥ अचतुरत्वादिसूत्रेण निपातनादकारांत
त्वं ॥ तस्य भावस्तत्ता तां स्पृशन्नाप्नुवन् गच्छन् ॥ वत्सतरो दम्यः इव वा दम्यवत्सतरौ समा इत्यमरः ॥ द्विपेंद्रभावं महाग
जत्वं श्रयन्नवक्षन्नु कलभः करिपोत इव गाम्भीर्येण चापलेन मनोहरं वपुः पुपोष ॥३२॥ अथेति ॥ गोनां हिते
बलीवर्दे ऋतुभेदर्षिभेदयोः स्त्रीलिङ्गस्यां दिशि भारत्यां भूमौ च पशुरश्मावपि ॥ द्वं स्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बा
णलोमसु इति केशवः ॥ गावो लोमानि केशा दीयंते खंड्यंतेऽस्मिन्निति व्युत्पत्त्या गोदानं । गोदानं नाम ब्राह्म
णादीनां षोडशादिषु वर्षेषु कर्त्तव्यं केशांताख्यं कर्मोच्यते ॥ तदुक्तं मनुना ॥ केशांतः षोडशे वर्षे ब्राह्मणस्य वि
धीयते ॥ राजन्यबंधोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः इति ॥ अथ गुरुः पिता ॥ गुरुर्गीष्पतिपित्राद्योरित्य
मरः ॥ अथास्य रघोः गोदानविधेरनंतरं विवाहदीक्षां निरवर्त्तयत्तत्तवानित्यर्थः ॥ अथ नरेंद्रकन्यास्तं रघु

© Dharmartha Trust J&K. Digitized by eGangotri

6

द्वस्पस्तुतारो हिरण्यादयस्तमोनुदं इंद्र मिव। तमोनुदोऽग्नि चंद्रार्कौ इति विश्वः॥ सत्पत्ति म वाप्यत्र आबभुः स रघु
रपितमोनुत॥ अत्र मनुः॥ वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमं॥ अविप्लुत ब्रह्मचर्यो गृहस्थाश्रममाविशेदि
ति॥३३॥ संप्रति यौवराज्ययोग्यतामाह॥ युवेति॥ युगो नाम धुर्यस्कंधगतः सच्छिद्रकाष्ठो यानांगभूतो दारुवि
शेषः॥ यानाद्युगे युगः पुंसि युगं युग्मे कृतादिषु इत्यमरः॥ युगवद्व्यायतौ दीर्घौ बाहू यस्य सः॥ अंसावस्य स्त इत्यं
सलो बलवान् मांसलश्चेति वृत्तिकारः॥ बलवान् मांसलोंसल इत्यमरः॥ वत्सांसाभ्यां कामबले इति लच् प्रत्ययः॥
कपाटवक्षाः अररे षाः॥ कपाटमररं तुल्ये इत्यमरः॥ परिणद्धकंधरो विशालग्रीवः॥ अथ ग्रीवायां शिरोधिः कंध
रेत्यपीत्यमरः॥ परिणाहो विशालतेत्यमरः॥ रघुर्वपुषः प्रकर्षादाधिक्याद्यौवनलता द्गुरुं पितरमजयत्तथापि
विनयान्नम्रत्वेन नीचैरल्पकोऽदृश्यत॥ अनौद्धत्यं च विवक्षितं॥३४॥ संप्रति यौवराज्यमाह॥ तत इ
॥६॥ ति॥ ततः आत्मना स्वयं चिरं धृतां नितांतगुर्वीं वोढुं गुरुं व ... दितिः प्रजानां ... पालनरूपां धुरं लघ ॥६॥
घयिष्यता लघूं करिष्यता। तत्करोति तदाचष्ट इति लघुशब्दाण्णिच्॥ ततो लृट्॥ लृटः सद्वेति शतृप्रत्ययः॥ नृ
पेण दिलीपेनासौ रघुर्निसर्गेण स्वभावेन संस्कारेण शास्त्राभ्यासजनितवासनया च विनीतो नम्र इति हे
तो र्युवराज इति शब्दं भजतीति तच्छब्दभाक्॥ भजो ण्विरिति ण्विः प्रत्ययः॥ चक्रे कृतः॥ द्विविधो विनयः स्वाभा
विकः कृत्रिमश्चेति कौटिल्यः॥ तदुभयसंपन्नत्वात्सुतं युवराजं चकारेत्यर्थः॥ अत्र कामंदकः॥ विनयोप
ग्रहान्भूत्यै कुर्वीत नृपतिः सुतान्॥ अविनीतकुमारं हि कुलमाशु विशीर्यते॥ विनीतमौरसं पुत्रं यौ
वराज्येऽभिषेचयेदिति॥३५॥ नरेंद्रेति॥ गुणान्विनयादीन् सौरभ्यादींश्चाभिलषतीति गुणाभिलाषिणी

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीः राज्यलक्ष्मीः पद्माश्रया च नरेंद्रो दिलीप एव मूलायतनं प्रधानस्थानं तस्मादपादानादनंतरं संनिहितं युवराज
इति संज्ञाऽस्य संजाता युवराजसंज्ञितं॥ तारकादित्वादितच्प्रत्ययः॥ आत्मनः पदं स्थानमास्पदं॥ आस्पदं प्रतिष्ठायामि
ति निपातः॥ स रघुरित्यास्पदं तदास्पदं कमला श्रियोत्पन्नान्नवावतारमचिरोत्पन्नमुत्पलमिव अभ्येनागच्छत्॥ श्रिया
हियं निरजयंतीति भावः॥३६॥ विभावसुरिति॥ सारथिना सहायभूतेन। एतद्विशेषणमुत्तरवाक्येऽप्यनुषंज
नीयं। वायुना विभावसुर्वह्निरिव। सूर्यवह्नी विभावसू इत्यमरः। घनमपायेन शरत्समयेन सारथिना गतनक्षि
मात्रसूर्य इव। कटो गंडः। गंडः कटो मदो दानमित्यमरः। तस्य प्रभेदः स्फुरणं मदोदय इत्यर्थः॥ तेन करीव पार्थिवो
दिलीपस्तेन रघुणा अतितरामत्यंतं सुदुःसहः सुष्ठु असह्यो बभूव॥३७॥ नियुज्येति॥ शतक्रतुरिंद्रः उपमा उ
पमानं यस्य स शतक्रतूपमः स दिलीपः॥ अतएव तस्य राजपुत्रा देवा आशापाला [illegible] दिक्पतुल्याः। राजसुतैरनु
द्रुतमनुगतं धनुर्द्धरं तं रघुं होमतुरंगाणां रक्षणे नियुज्य एकेन क्रतुना अपूर्णमेकोनं क्रतूनामश्वमेधानां
शतमपविघ्नमपगतविघ्नं यथा तथा आप॥३८॥ तत इति॥ ततः परमेकोनशतक्रतुप्राप्त्यनंतरं यज्वना
विधिनेष्टवता तेन दिलीपेन पुनरपि मखाय मखं कर्तुं। क्रियार्थेत्यादिना चतुर्थी। उत्सृष्टं मुक्तमनर्गलम
प्रतिबंधं अव्याहतस्वैरगतिमित्यर्थः॥ अपर्यावर्तयंतोऽश्वमनुचरंतीत्यापस्तंबस्मरणात्। तुरंगं धनुष्मतां
रक्षिणां रक्षकाणामग्रत एव वज्रीको गूढविग्रहः सन् जहार किलेत्यैतिह्ये॥३९॥ विषादेति॥ तत्कुमारसे
न्यं सेनां सपदि विषादइष्टनाशात्ततो मनोभंगः॥ तदुक्तं। विषादश्चेतसो भंगउपायाभावनाशयोरिति।
तेन लुप्ताप्रतिपत्तिः कर्तव्यज्ञानं यस्य तत्तथोक्तं। विस्मितमश्वनाशस्याकस्मिकत्वादाश्चर्याविष्टं सत्स्थि
तं तस्थौ॥ अथ श्रुतप्रभावा यदृच्छया स्वेच्छया आगतां नंदिनीनाम वसिष्ठधेनुं स ददर्श॥ रघोः स्वप्र

© Dharmartha Trust J&K. Digitized by eGangotri

सादलब्धत्वादनुज्ञिघृक्षयेतिभावः। द्वौ चकारावविलंबसूचकौ॥४१॥ तदिति॥ ततोऽनुरक्तः इङ्गितो दिली
पनंदनो रघुः तत्पुण्येन तस्या नंदिन्याः यदंगं तस्य निस्पंदोद्भवः स एव जलं मूत्रमित्यर्थः॥ तेन लोचने प्रमृज्य शोधयि
त्वा अतींद्रियेष्वप्यइंद्रियाण्येयेतिक्रांतेषु॥ अत्यादयः क्रांताद्यर्थे द्वितीययेति समासः॥ द्वित्तुप्राप्तापन्नालंपूर्व
गतिसमासेषु परवल्लिंगताप्रतिषेधाद्विशेष्यनिघ्नत्वं॥ भावेषु वस्तुषु उपपन्नदर्शनः संपन्नसाक्षात्का
रसामर्थ्यो बभूव॥४२॥ स इति॥ नरदेवसंभवः स रघुः पुनः स तेन सारथिना निषिद्धचापलं निवारितोद्धत्यं
रथरश्मिसंयतं प्रग्रहैः॥ किरणप्रग्रहौ रश्मी इत्यमरः॥ संयतं बद्धमश्वं हरंतं पर्वतपक्षाणां शातनं छेद
कं देवमिंद्रं पूर्वतः पूर्वस्यां दिशि ददर्श॥४३॥ शतेति॥ रघुस्तमश्वहर्तारं अनिमेषवृत्तिनिर्निमेषव्या
पारस्तैर्हयानां शतैः हरिर्जिंद्रं हरिं इतरौ॥ हरिर्वाच्यवदाख्यातो हरिःकपिलवर्णयोरिति विश्वः॥ वाजिनि
रश्वैश्च हरिमिंद्रं विदित्वा ज्ञात्वा॥ हरिर्वातार्कचंद्रेंद्रयमोपेंद्रमरीचिषु इति विश्वः॥ एनमिंद्रं गगनस्पृ
॥७॥ शा व्योमव्यापिना धीरेण गंभीरेण स्वरेण ध्वनिनेव निवर्तयन्निव अवोचत॥४४॥ मखेति॥ हे देवेंद्र मनी ॥७॥
षिभिस्त्वमेव मखांशभाजां यज्ञभागभुजां प्रथमः सदा निगद्यसे कथ्यसे॥ तथापि अजस्रदीक्षायां नित्य
दीक्षायां प्रयतस्य मद्गुरोः क्रियाविघाताय क्रतुविघाताय क्रियां विहंतुमित्यर्थः॥ तुमर्थाच्च भाववचनादिति
चतुर्थी॥ कथं प्रवर्तसे॥४५॥ त्रिलोकेति॥ त्रयाणां लोकानां नाथ[illegible]लोकनाथः॥ तद्धितार्थेत्यादिना उत्त
रपदसमासः॥ तेन त्रैलोक्यनियामकेन दिव्यचक्षुषा अतींद्रियार्थदर्शिना त्वया मखद्विषः क्रतुविघा
तकाः सदा नियम्याः ननु शिष्याः खलु॥ स्वयं धर्मचारिणां कर्मसु क्रतुषु स्वयमंतरायो विघ्नो भवसि

© Dharmartha Trust J&K. Digitized by eGangotri

चेत्विधिरनुष्ठानंच्युतःलोकेसत्कर्मकथैवास्तमियादित्यर्थः॥४५॥तदिति॥हेमघवन्तत्तस्मात्कारणान्महाक
तोरश्वमेधस्याग्र्यंश्रेष्ठमंगंसाधनममुंतुरंगंप्रतिमोक्तुंप्रतिदातुमर्हसि॥तथाहिश्रुतेःपथोदर्शयितारः
सन्मार्गदर्शकाईश्वरामहान्तःमलीमसांमलिनांपद्धतिंमार्गंनाददतेनस्वीकुर्वन्ति।असन्मार्गंनावलम्बं
तइत्यर्थः॥मलीमसंतुमलिनंकच्चरंमलदूषितमित्यमरः॥४६॥इतीति॥इतिरघुणासमीरितंप्रगल्भं
वचोनिशम्याकर्ण्यदिवौकसःस्वर्गौकसः॥दिवंस्वर्गेन्तरिक्षेचेतिविश्वः॥तेषाममधिपतिरिन्द्रोरघुप्रत्या
वास्तविस्मयःसन्नुरथंनिवर्तयामास॥उत्तरंप्रतिवक्तुंप्रचक्रमेच॥४७॥यदिति॥हेराजन्यकुमारक्षत्रि
यकुमार॥मूर्द्धाभिषिक्तोराजन्योबाहुजःक्षत्रियोविराडित्यमरः॥यद्वाक्यमात्थब्रवीषि॥ब्रुवःपंचाना
मित्यादिनाआहादेशः॥तत्तथासत्यंकिंतुयशोधनैरस्मादृशैःपरतःशत्रुतोयशोरक्ष्यं।ततःकिमतआह॥न तिरस्कर्तुं
वद्गुरुस्त्वत्पिताजगत्प्रकाशंलोकप्रसिद्धमशेषंसर्वंममतद्यशःइज्ययायागेनलंघयितुंतर्कयितुमुद्य
तःउद्यतः॥४८॥किंतत्रापराधमित्याह॥हरिरिति॥पुरुषोत्तमइतिसप्तमीसमासः॥ननिर्धारणइतिषष्ठी
समासनिषेधात्कर्मधारयेतुसन्महत्परमोत्कृष्टाःपूज्यमानैरित्युत्तमपुरुषइतिस्यात्॥यथाहरिर्वि
ष्णुरेकएवपुरुषोत्तमःस्मृतःत्र्यंबकःशिवएवमहेश्वरःस्मृतोनापरःअपरःपुमान्नतथा॥तथामा
मुनयःज्ञातक्रतुंविदुः॥विदोलटोवेतिणलादेशः।नोऽस्माकंहरिहरयोर्ममचेत्यर्थः॥एवंत्रितयोपि[illegible]
द्वितीयगामीनहि॥द्वितीयाश्रितेतिगम्यादीनामुपसंख्यानात्समासः॥४९॥अतइति॥यतोऽहमे
वंतत्क्रतुरतस्त्वदीयस्यपितुःअयंयज्ञतमोऽश्वःकपिलानुकारिणाकपिलमुनितुल्येनमयाऽपहृ

© Dharmartha Trust J&K. Digitized by eGangotri

रितोऽपहृतः॥ अपराजितः इति स्वार्थे णिच्॥ तथा चात्राश्वमयं नेनालंभयन्तो मा कारीत्यर्थः॥ निषेधस्य निषेधं प्र
तिकरणत्वात्तृतीया॥ सगरस्य राज्ञः संततेः संतानस्य पदव्यां पदं मा निधाः मा निधेहि इति॥ निपूर्वात् धातेर्लु
ङ्॥ न माङ्योगे इत्यडागमप्रतिषेधः॥ महदादिस्कंदनं ते विनाशमूलं भवेदिति भावः॥५०॥ ततः इति॥ ततः स्वरगस्य
रक्षिता रघुः प्रहस्य प्रहासं कृत्वा उपनयोनिर्भीकः सन्पुनः पुरंदरं बभाषे॥ किमिति॥ हे देवेंद्र एष अश्वमो
चनरूपस्तत्तव सर्गो निश्चयो यदि॥ सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिष्वित्यमरः॥ तर्हि शस्त्रं गृहा
ण॥ न चानुरघुं मामनिर्जित्य त्वमेतमनेनेति हरती [illegible] स्वल्पु॥ कृष्टादिभ्यश्चेतीनिप्रत्ययः॥ रघुग्रहणा
दात्मनो दुर्जयत्वं सूचयति॥५१॥ स इति॥ स रघुरुन्मुखः सन्मघवंतमिंद्रमेवमुक्त्वा शरासनं चापं सशरं
करिष्यमाणः॥ आलीढेन आलीढाख्येन स्थानकेन देनविशेषेण [illegible] मशो भिनावपुः प्रकर्षेण देहो
न्नत्येन विडंबितस्वरोऽनुकृतपिनाकी स च अतिष्ठत॥ आलीढ [illegible] लक्षणम् [illegible]॥ स्थानानि धन्विनां
पंच तत्र वैशाखमस्त्रियाम्॥ त्रिवितस्त्यंतरौ पादौ मंडलं तोरणाकृति॥ अन्वर्थं स्यात् [illegible] समपदं मालीढं तु ततोऽ
॥८॥ ग्रतः॥ दक्षिणे वाममाकुंच्य प्रत्यालीढं विपर्यय इति॥५२॥ रघोरिति॥ रघोरवष्टंभमयेन तत्र रूपेण॥ अ ॥८॥
वष्टंभः सुवर्णे च स्तंभे प्रारंभगर्वयोरिति विश्वः॥ पत्रिणा बाणेन हृदि हृदये हतो विद्धः अत एवामर्षेणा सह
नः क्रुद्ध इत्यर्थः॥ गोत्रभिदपीन्द्रोऽपि॥ संभावनीये धीरेऽभिगोत्रः द्रोणी धरे मतः इति विश्वः॥ नवांबुदानांअ
नीकस्य समूहस्य मुहूर्तं क्षणमात्रं लांछने चिह्नभूते धनुषि दिव्ये धनुषि [illegible] अमोघमवंध्यं सायकं समधत्त
संहितवान्॥५३॥ दिलीपेति॥ भीमानां भयंकराणां असुराणां शोणितैः रुधिरैरुचितः परिचितः स

© Dharmartha Trust J&K. Digitized by eGangotri

इंद्रमुक्त आशुगः सायकः दिलीपसूनोः रघोर्बृहत् विशालं भुजांतरं वक्षः प्रविश्य अनास्वादितपूर्वं पूर्वमनास्वा
दितं ॥ सुप्सुपेति समासः ॥ मनुष्यशोणितं कुतूहलेनेव पपौ ॥५४॥ हरेरिति ॥ कुमारस्य विक्रमहृव विक्रमोय
स्य स तथोक्तः ॥ सप्तम्युपमानपूर्वस्येत्यादिना समासः ॥ कुमारो रघुः पसुरद्विपस्य ऐरावणस्य आस्फालनेन
कर्कशा अंगुलयो यस्य स तस्मिन् शच्याः पत्रविशेषकैः अंकितः शचीपत्रविशेषकांकितः हरेरिंद्रस्य भुजे स्व
नामचिह्नं स्वनामांकितं सायकं निचखान निखातवान् । निष्कृष्टकरात् अमनुष्यायं महान् निमन्वद्‌ इति भावः
५५ ॥ जहारेति ॥ अन्येन मयूरपत्रिणा मयूरपत्रवता शरेण शक्रस्येंद्रस्य महाशनि ध्वजं महांतमशनि निरू
पं ध्वजं जहार चिच्छेद स शक्रः सुरश्रियः प्रसह्य बलात्कृत्य केशानां व्यपरोपणादि ... छेदनादिव तस्मै
रघवे नितरामत्यर्थं चुकोप । तं हृतं तु मियेषत्यर्थः ॥ ... ॥५६॥ तयोरिति ॥ जयैषि
णोस्तयोरिंद्ररघ्वोः गरुत्मंतः पक्षवंतः ॥ गरुत्पक्षच्छदाः पत्रमित्यमरः ॥ आशीविषदंष्ट्राया विषमयानि ते आशीविषाः
सर्पाः ॥ पृषोदरादित्वात्साधुः ॥ आशीरुरगदंष्ट्रायामित्यमरः ॥ तद्भवनीमद ... स पक्षाः सर्पा इव भयावहा
इत्यर्थः ॥ तैरधोमुखैरूर्ध्वमुखैश्च ॥ यन्तिनो ... पर्यवोदयावस्थितत्वादिति भावः ॥ पत्रिभिर्बाणैः उपांतस्थि
ता स्तरस्थाः सिद्धादेवाः इंद्रस्य सेनिकाश्च रघोर्यस्मिन् तत्तथोक्तं । तुमुलं संकुलं युद्धं बभूव ॥५७॥ अतीति ॥ वा
सवोऽतिप्रबंधेनातिसातत्येन प्रहिताः प्रयुक्ताग्निः अस्त्रवृष्टिभिः दुःप्रसहस्य दुःखेन प्रसह्यत इति दुःप्र
सहस्य दुःखेनाप्यसह्यस्येत्यर्थः ॥ तेजसः प्रतापस्य आश्रयं तं रघुं अंबुदोऽद्भिः स्वतश्च्युतं वह्निमिव निर्वाप
यितुं निवारयितुं न शशाक । रघोरपि लोकपालात्मकत्वेन इंद्रांशसंभवत्वादिति भावः ॥५८॥ ततइति ॥ त
तो रघुः हरिचंदनांकितप्रकोष्ठं मणिबंधप्रमध्यमानार्णवधीरनादिनी प्रमध्यमानार्णववद्ध्वधीरं गंभीरं न

© Dharmartha Trust J&K. Digitized by eGangotri

३

दतीति तां तन्न थोक्तं वेवेष्टि व्याप्नोतीति विड् व्यापकमोजो यस्य तस्य विडौजसः [illegible] स्याप्रुषोऽस्मादित्वात्साधुः।
शरासनज्यां धनुर्मौर्वीं शशांकस्य अर्द्धः खंड इव मुखं फलं यस्य तेन पत्त्रिणा बाणेन अछिनत्॥५९॥ स दृप्तेति॥
विवृद्धमत्सरः प्रवृद्धवैरः स दृप्तबलस्य प्रबलस्य विद्विषः शत्रोः प्रणाशनाय वधाय महीं धारयंतीति
महीध्राः पर्वताः। मूलविभुजादित्वात्कप्रत्ययः॥ तेषां पक्षव्यपरोपणे पक्षच्छेदे उचितं स्फुरत्प्रभामंडलम्
अस्त्रं वज्रायुधं माददे जग्राह॥६०॥ रघुरिति॥ रघुस्तेन वज्रेण भृशमत्यर्थं वक्षसि ताडितो हतः सन् से
निकानामस्रुभिः सह नमो पपात। तस्मिन्पतिते रुरुदुरित्यर्थः। निमेषमात्रात्क्षणाद्दुःखं मवधू
१ यतिरस्कृत्य सैनिकानां येर्हर्षेमिनिस्वानाः क्ष्वेडास्तैः [illegible] उत्थितम्॥ तस्मिन्नुत्थिते हर्षान्नु सिंहनादा
श्च क्रुरित्यर्थः॥६१॥ तथापीति॥ तथापि वज्राघाते ऽपि शस्त्राणां व्यवहारणे व्यापारेणा निष्ठुरे क्रूरे
॥६१॥ विपक्षत्वाच्छात्रवे स्थिरं तस्थुषः स्थितवतो ऽस्य रघोः वीर्यमिति [illegible] ॥ [illegible] हतवानिति वृत्र ॥६१॥
हा॥ वृत्रघ्नेत्र [illegible] क्विप्॥ ततोष॥ स्वयं वीर एव वीरं जानातीति भावः॥ कथं शत्रोः संतो
षोऽत आह॥ गुणैः सर्वत्र शत्रुमित्रोदासीनेषु पदं मं घ्रि निधीयते॥ गुणैः सर्वत्र सकम्पतद्गत्यर्थः॥
गुणाः शत्रूनप्यावर्जयंतीति भावः॥६२॥ असंगमिति॥ [illegible] ऽद्रिष्वप्यसंगमप्रतिबंधं मे
आयुधं वज्रं त्वदन्येन न विसोढम् अतो मां प्रीतं संतुष्टमवेहि तुरंगमाद्दृते तुरंगमं वर्जयित्वा॥ अन्या
रादितरर्त्तेइति पंचमी॥ किमिच्छसीति स्फुटं वासव आह॥ तुरंगमादन्यद्देयं नास्तीति भावः॥६३॥

© Dharmartha Trust J&K. Digitized by eGangotri

ऊ गत्वा गसमीरणः न त्रस्वद्वाना वित्यमरः ॥ मार्गे स्थितो ऽयनं वर्त्म मार्गोध्व पंथानः पदवी सृतिरित्यमरः । तं सिषेविरे ॥
॥ ७२ ॥ विश्राश्रमुरिति ॥ सैनिकाः सेनायां समवेताः । प्राग्वहतीय [illegible] कूप्रत्ययः । सेनायां समवेता ये सैन्यास्ते सैनिका
श्चेत्यमरः । नमेरूणां सुरपुन्नागानां नमेरुः सुरपुन्नाग इत्यमरः । छायासु अनातपेषु । छाया पंक्तौ प्रतिमायामर्क
योषित्यनातपे । इत्युभयत्रापि । पालनेकां [illegible] शौ नायां वत्समस्य पीतिहेमः । निषण्णानां उपविष्टानां मृगाणां कस्तूरीम
गाणां नाभिः प्राणैर्गंधैः । मृगनाभिर्मृगमदः कस्तूरीत्यमरः । नाभिर्मुख्यनृपे प्राणे क्षत्रिये ऽपि च पुंस्यसौ । चक्रमध्ये मृगमदे ऽ प्यौग्रे
राद्रीचेतिहेमः । वासिताः सुरभीकृताः । शिलातलाः उदः शिलाः । पाषाणप्रस्तरग्रावोपलाश्मानः शिलादृषदित्य
मः । अध्यास्याधिष्ठाय विश्रामुर्विश्रान्ताः ॥ ७३ ॥ सरलेति ॥ सरलेषु देवदारुवृक्षेषु । पीतद्रुः सरलः पूतिका
ष्ठं चेत्यमरः । सरलस्तु पीतदारौ पूतिकाष्ठे चेतिहेमः । [illegible] सक्तानियमिता तंगा नागजानां मातंगः श्वपचो हस्ती
इतिहेमः । ग्रीवासु भवानि ग्रैवेयाणि कण्ठभूषणानि । ग्रीवाभ्यो ऽण् चेति चकाराड्ठञ् प्रत्ययः । श्रृंखले उच्च
इतिहेमः । ग्रीवासुभवानि ग्रैवेयाणि कण्ठभूषणानि । ग्रीवाभ्योऽण्चेति चकाराढ्ढञ्प्रत्ययः । श्रृंखले इत्यु
लीकां चालोहरज्जौ च वंधने इति हेमः । तेषु स्फुरितत्विषः प्रतिफलितत्विषः । स्फुरप्रकाशरूरुचिस्त्विड्भानाम्बु
लीकां चालोहरज्जौ चबंधने इतिहेमः । तेषु स्फुरिततविषः प्रतिफलितत्विषः । स्फः प्रभा रुक्रुचिस्त्विड्भा भा
विद्युतिर्दीप्तय इत्यमरः । ओषधयः नक्तं रात्रौ ज्वलंतो लता विशेषाः नेतुर्नायकस्य रघोः अस्नेहदीपिकाः तैल
निरपेक्षाः प्रदीपाः । स्नेहः प्रेम्णि घृतादिके इतिहेमः । दीपः प्रदीप इत्यमरः । दीपको दीप्तिकृद्दीपावितिहेमः । आसन् ॥ ७४ ॥
॥ ७५ ॥ तस्येति ॥ तस्य रघोः रूढेषु वृक्षेषु निवासेषु सेनानिवेशेषु कंठरज्जुभिः गजग्रैवेयैः निष्पिष्टा
त्वचो येषां ते देवदारवः किराते भ्यो वनचरेभ्यः । किरातः स्याद्भुपतनौ म्लेच्छ निवपोरपीतिहेमः । गजानां
वर्ष्मप्रमाणं । वर्ष्मदेहप्रमाणयोरित्यमरः । त्राता सु कथितवंतः । देवदारुस्कंधत्वकच्छेदैर्गजानामौन्नत्यमनु
मीयत इत्यर्थः ॥ ७५ ॥ तत्रेति ॥ तत्र हिमाद्रौ रघोः पर्वते भवैः पर्वतीयैः । पर्वताच्छइति छप्रत्ययः । गणैरु
त्सवसंकेताख्यैः सप्तभिः सह ॥ [illegible] तिमहाभारते ॥ नाराचानां

© Dharmartha Trust J&K. Digitized by eGangotri

स० र० ४

बालत्वविशेषाणां द्वीपपर्णीयानां शिडिपालानामश्मनां च निषेषणेन संघर्षेणोत्पतिताः अनलाः। अत्र यो यस्मिन्नुत्पद्यते
न्न् द्वैपर्णीयो शिडिपालः स्वर्गादीर्घो मद्दोपल इत्यादवः। घोरं भीमं जन्यं युद्धमन्न् तर। दारुणं भीषणं भीष्मं घोरं
भीमं भयानकं भयंकरं प्रतिभयं रौद्रं तूग्रममी त्रिषु चित्यमरः। युद्धमायोधनं जन्यमित्यमरः॥७६॥ शरैरिति॥
स रघुः शरैर्बाणैः उत्सवसंकेतान्नाम गणान्विरतोत्सवान्कृत्वा जित्वेत्यर्थः। किन्नरान् बाहुबलजयोर्ज
योदाहरणं जयस्यापकं प्रबन्धविशेषं गापयामास। भुजबाहू प्रवेष्टो दोरित्यमरः। गतिबुद्धीत्यादिना किंनरा
णां कर्मत्वं॥७७॥ परस्परेति॥ तेषु गणेषु उपायनयुक्ताः पाणयो येषां तेषु सत्सु। उपायनमुपग्राह्यमुपहार
स्तथोपदेत्यमरः। परस्परेणान्योन्यं राज्ञा हिमवतः सारो धनरूपो विज्ञातः। हिमाद्रिणा राज्ञः सारो बलरूपो
विज्ञातः। एतेन तत्रत्य सवल्लनामन घर्षलगणानाम नूतं पूर्वं पराजय इति ध्वन्यते॥७८॥ तत्रेति॥ स रघुः तत्र
हिमाद्रौ अक्षोभ्यं अप्रधृष्यं यशोराशिं कीर्तिपुञ्जं। यशः कीर्तिः समज्ञा चेत्यमरः॥ राशिर्मेषादि पुञ्जयोरिति है १०
मः। निवेश्य स्थापयित्वा पौलस्त्येन रावणेन तुलितस्य चालितस्याद्रेः कैलासस्य ह्रिया लज्जया। मंदाक्षं ह्रीस्त्रपा
१० व्रीडा लज्जा सापत्रपेत्यमरः। आदधानो जनयन्निवावरुरोह। कैलासमगत्वेव प्रतिनिवृत्त इत्यर्थः। न हि
स्मराः परेण पराजितमभियुञ्जत इति भावः॥७९॥ चकंपेति॥ तस्मिन् रघौ तीर्णलौहित्ये नाम नदी येन तस्मि
न्तीर्णलौहित्ये सति प्राग्ज्योतिषाञ्जनपदानामीश्वरस्तस्य रघोर्गजानामालानतां प्राप्तैः कालागुरुद्रुमैः कृष्णा
गुरुवृक्षैः सह चकंपे कंपितवान्। तोत्रं वेणुकमालानं बंधस्तंभ इत्यमरः। अथ समार्थकं। वंशिकागुरुरा
जार्हलोहकृमिजजोंगकं कालागुर्वित्यमरः॥८०॥ नेति॥ स प्राग्ज्योतिषेश्वरः रुद्धार्कं मार्ग सहस्थं। अबडड्डु
ने द स्फटिके ताम्रसूर्ये विडौजसीति हेमः। आसारो वर्षं च तद्दुर्दिनं च धारावृष्टिं विना दुर्दिनीभूतं अस्य रघोः र
थवर्त्म रजोपि न प्रसेहे। पताकिनीं सेनां [illegible] सेहे न कुतोपीत्यर्थः। ध्वजिनी वाहिनी सेना पृतनानीकिनी च

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीसदाशिवाय नमः ॥ शारदा शारदांभोजवदना वदनांबुजे । सर्वदा सर्वदास्माकं संनिधिं संनिधिं क्रियात् ॥ १ ॥
स इति ॥ स रघुर्गुरुणा पित्रा दत्तं राज्यं राज्ञः कर्म प्रजापरिपालनात्मकं ॥ पुरोहिता दिवा घक ॥ प्रतिपद्य प्राप्य दि
नांते सायंकाले सवित्रा सूर्येण निहितं तेजः प्रतिपद्य हुताशनोऽग्निरिवाधिकं बभौ ॥ सौरं तेजः सायमग्निं संक्रमते
आदित्यो वा अस्तं यन्न अग्निमनुप्रविशति अग्निं वा आदित्यः सायं प्रविशतीत्यादि श्रुतिः प्रमाणं ॥ [illegible] दिलीपेति ॥ दिली
पानंतरं राज्ये प्रतिष्ठितमवस्थितं तं रघुं निशाम्याकर्ण्य पूर्वं दिलीपकाले राज्ञां हृदये । प्रकृष्टा [illegible] ऽस्य संजातः प्रशू
मितोऽग्निः संतापाग्निरूस्थितः तद्वत्प्रज्वलितद्वत् ॥ पूर्वाभ्यधिकः संतापोऽभूदित्यर्थः ॥ [illegible] ॥ स्यापि निशम्य मनस्या
ग्रात्वुपचारान्नासमानकर्तृकत्वविरोधः स्यादर्थः ॥ ॥ २ ॥ पुरुहूतेति ॥ पुरुहूत [illegible] ध्वजः स किल हृष्टप्रार्थराज
भिः हृष्टतद्वत्फलकं भविष्योत्तरे ॥ एवं यः कुरुते यात्रां मिंद्रकेतोर्युधिष्ठिर ॥ पर्जन्यः कामवर्षी स्यात्तस्मिन्राज्ये न
संशय इति ॥ पुरुहूतध्वजस्येव तस्य रघोर्नवाभ्युत्थाने मन्नतिमन्युदयं च नवाभ्युत्थाने [illegible]
[illegible] ॥ [illegible] मित्यर्थः ॥ [illegible]
[illegible] इति ॥ [illegible] इति [illegible] कर्त्तायुप [illegible] विति [illegible] ति
न [illegible] यं [illegible] तं [illegible] ॥ पितुः [illegible] पिण्यं ॥ पितुर्यदि [illegible]
मेघा सिंहासनमखिलमरिणंमंडलं राष्ट्रं च ॥ ४ ॥ अथ सिंहासनारोहणानंतरं तस्य लक्ष्मीसंनिधानमाह ॥
छायेति ॥ अन्वरघोस्तेजोविशेषेण स्वयं संनिहितयालक्ष्म्या छत्रधारणं कृतमित्युत्प्रेक्ष्यते ॥ पद्मा ले९

© Dharmartha Trust J&K. Digitized by eGangotri

तत्र

क्ष्मीः॥ लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रियेत्यमरः॥ सा स्वयमदृश्या किल॥ किलेति संभावनायां॥ सती
छायामंडललक्ष्येण कांतिरूपं जानुमेयेन न तु स्वस्वरूपतो दृश्येन॥ छायामंडलमित्यनेनानातपत्रज्ञानं दृश्यते॥
छाया सूर्यप्रिया कांतिः प्रतिबिंबमनातप इत्यमरः॥ तेन पद्मातपत्रेण पद्ममेवातपत्रं न करणं कृते
न साम्राज्यदीक्षितं साम्राज्ये साम्राज्यकर्मणि मंडलाधिपत्ये दीक्षितमभिषिक्तं॥ तं रघुं भेजे॥ अन्यथा कथ
मेतादृशी कांतिसंपत्तिरिति भावः॥५॥ संप्रति सरस्वतीसान्निध्यमाह॥ परीति॥ सरस्वती काले काले सर्वेष्व
पि योग्यकालेषु॥ नित्यवीप्सयोरिति वीप्सायां द्विर्वचनं॥ बंदिषु परिकल्पितसांनिध्या कृतसंनिधाना सती स्तुत्यं स्तो
त्रार्हं रघुं अर्थ्याभिरर्थादनपेताभिः॥ धर्मपथ्यर्थन्यायादनपेत इति यत्प्रत्ययः॥ स्तुतिभिः स्तोत्रैरुपतस्थे॥ देवता
बुध्या पूजितवतीत्यर्थः॥ देवतात्वं च ना विष्णुः पृथिवीपतिरिति वा लोकपालात्मकला इत्यनुसंधेयं॥ एवं च स ॥१॥
तित पादेव पूजासंगतकरणमित्रकरणपरिभाषितिवर्त्तमा[illegible]ने पदं सिध्यति॥६॥ मन्विति॥ वसुंधरा मनु
॥१॥ प्रभृतिभिर्मन्वादिभिर्मान्यैः पूज्यैः राजभिः भुक्ता यद्यपि भुक्तैवेत्यर्थः॥ यद्यपीत्यवधारणे॥ अपूर्वेयदिवा
पूर्वैस्यादिति केभाव॥ तथापि तस्मिन्रघौ अनन्यः पूर्वो यस्याः सा अनन्यपूर्वा अन्यपूर्वा न भवतीत्यनन्यपूर्वा
अन्यन्योपभुक्तेवासीत्॥ तत्प्रथमपतिके चानुरक्तवतीत्यः॥७॥ अत्र कारणमाह॥ स इति॥ हि यस्मात्कारणा
त् स रघुर्यक्रदंडतया यथापराधदंडतया सर्वस्य लोकस्य मन आददे जहार॥ कथमिव॥ अतिशीतोऽत्यु
ष्णो वा न भवतीति नातिशीतोष्णः॥ नञर्थस्य नञाक्षेपस्य सुप्सुपेति समासः॥ दक्षिणे दक्षिणदिग्भवो न

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मान्वासुरिव मलयानिल इवेत्यर्थः॥ युक्तदंडतयेत्यत्र कामंदकः॥ उद्वेजयति तीक्ष्णो न मृदुनापरिभूयते॥ दंडे
न नृपतिस्तस्माद्युक्तदंडः प्रशस्यत इति॥ ८॥ मंदेति॥ तेन रघुणा प्रजाः गुरौ दिलीपे विषये सहकारोऽतिसौरभश्चू
तः॥ आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभ इत्यमरः॥ तस्य फलेन पुष्पो[illegible]मे पुष्पोदय इव ततोपि गुणाधिक
तया हेतुना मंदोत्कंठाः अल्पोत्सुकाः कृताः॥ गुणो[illegible]त्तरो विषयः पूर्वं विस्मारयतीति भावः॥ ९॥ नयेति॥
नयविद्भिः नीतिशास्त्रज्ञैः नवे तस्मिन्राज्ञि विषये तमधिकृत्येत्यर्थः॥ सत् धर्मयुद्धादिकं असत् कूटयुद्धादि
कं चोपदर्शितं तस्मिन्राज्ञि पूर्वः पक्ष एवाभवत् संक्रांत इत्यर्थः॥ उत्तरः पक्षो नाभवत् न संक्रांत इत्यर्थः॥ तत्र
सदसतोर्मध्ये सदेवाभिमतं नासत्॥ पक्षः साधनयो[illegible]॥ पक्षः [illegible] सहाय बलभित्त्रिविधमिति के
शवः॥ १०॥ पंचानामिति॥ पृथिव्यादीनां पंचानां भूतानां गुणाः गंधा[illegible]दयः उत्कर्षमतिशयं पुपुषुः॥ अत्रे
त्यवृत्ते॥ तस्मिन्रघौ नाम नवे महीपाले सति सर्वं वस्तुजातं नवमिवाभवत्॥ तदेव भूतजातमिदानी
मपूर्वगुणयोगादपूर्वमिवाभवदिति भावः॥ ११॥ यथेति॥ यथा चंद्रयत्याल्हादयतीति चंद्रः इंदुः॥ चदि
धातोरौणादिकरप्रत्ययः॥ आल्हादनादाल्हादकारणादन्वर्थोनुगतार्थनामकोऽभूत् यथा चंडं तपतीति तप
नः सूर्यः॥ नंद्यादित्वाल्ल्युप्रत्ययः॥ प्रतापात्संतापजननादन्वर्थः॥ तथैव स राजा प्रकृतिरंजनादन्वर्थः सार्थकः राज
शब्दो राजतेर्दीप्त्यर्थात्कनिन्प्रत्ययांतो न तु रंजेः तथापि धातूनामनेकार्थत्वाद्रंजनाद्राजेत्युक्तं कविना॥ १२॥
कामेमिति॥ विशाले तस्य रघोर्लोचने कामं कर्णांतयोर्विश्रांते कर्णांतगते च चक्षुष्मतां तु चक्षुः फलंवित्यर्थः॥

© Dharmartha Trust J&K. Digitized by eGangotri

सूक्ष्मान् कार्यार्थान् कर्तव्यार्थान् दर्शयति प्रकाशयतीति सूक्ष्मकार्यार्थदर्शिना शास्त्रेणैव शास्त्रं दृष्टिर्विवेकिनामि
तिभावः ॥१३॥ लब्धेति ॥ अथ लब्धस्य राज्यस्य प्रशमनेन परिपंथिनिनाशमनुरंजनप्रतिकाराभ्यां स्थिरीकरणेन स्व
स्थं समाहितचित्तमेनं रघुं पंकजलक्षणा पद्मचिह्ना श्रियोऽपि विशेषणमेतत् ॥ शरत् द्वितीया पार्थिवश्रीः राजलक्ष्मी
रिव समुपस्थिता प्राप्ता ॥१४॥ निर्वृष्टेति ॥ निःशेषं वृष्टाः निर्वृष्टाः कर्तरि क्तः अत एव लघवः तैर्मेघैर्मुक्तवर्त्मोत्
क्रमार्गः अत एव सुदुःसहः तस्य रघोः भानोश्च प्रतापः पौरुषमातपश्च ॥ प्रतापौ पौरुषातपाविति यादवः ॥
युगपद् दिशो व्यानशे व्याप ॥१५॥ वार्षिकमिति ॥ इंद्रो वर्षासु भवं वार्षिकं वर्षानिमित्तमित्यर्थः ॥ वर्षाभ्यष्ठगिति
ठक्प्रत्ययः ॥ धनुः संजहार ॥ रघुः जैत्रं जयशीलं जेतृशब्दात् तृन्नंतात् प्रज्ञादिभ्यश्चेति स्वार्थेऽण्प्रत्ययः ॥ धनु
र्दधौ ॥ हि यस्मात् तौ विंद्ररघू प्रजानामर्थस्य प्रयोजनस्य वृष्टिविजयलक्षणस्य साधने विषये पर्यायेण धृतकार्मु
॥२॥ केयाभ्यां तौ पर्यायोद्यतकार्मुकौ ॥ पाठांतरे पर्यायेणोद्यमो विश्रमश्च ययोस्तौ पर्यायोद्यमविश्रमौ ॥ द्वयोः पर्यायक ॥२॥
रणात् क्लेशादिति भावः ॥१६॥ पुंडरीकेति ॥ पुंडरीकं सितांभोजमेवातपत्रं यस्य स तथोक्तः पुंडरीकं सितांभोजमित्यम
रः ॥ विकसंति काशानि काशाख्यतृणकुसुमान्येव चामराणि यस्य स तथोक्तः ॥ ऋतुः शरदृतुः पुंडरीकमिवातपत्रं का
शामिव चामरं तं रघुं विडंबयामास ॥ अनुचकार ॥ तस्य रघोः श्रियं पुनः शोभां तु न प्राप ॥ शोभा संपत्तिः पद्मा सुलक्ष्मीः
श्रीरिव हृद्यत इति केशवः ॥१७॥ प्रसादेति ॥ प्रसादेन सुमुखे तस्मिन् रघौ विशदप्रभे निर्मले कांतौ चंद्रे च द्वयोर्वि
षये तदा चक्षुष्मतां नेत्रवतां द्वंद्वं सा ॥ प्रीतिरनुरागः समरसा समप्रवा दातुल्यभोगेति यावत् ॥ रसो गंधे रसः स्वदे

© Dharmartha Trust J&K. Digitized by eGangotri

विति विश्वः ॥ आसीत् ॥ १८ ॥ हंसेति ॥ हंसानां श्रेणीषु पंक्तिषु तारासु नक्षत्रेषु कुमुदानि येषु संतीति कुमुद्वंति कुमुद
प्रायेष्वित्यर्थः ॥ कुमुद्वान् कुमुदप्राय इत्यमरः । कुमुदनड्वेतसेभ्यो ड्मतुप् ॥ तेषु वारिषु च तदीयानां रघुसंबंधिनां य
शसां विभूतयः संपदः पर्यस्ता इव प्रसारिताः किमित्युत्प्रेक्षा । अन्यथा कथमेषां एष धवलिमेति भावः ॥ १९ ॥ इक्ष्विति ॥
इक्षूणां छाया इक्षुच्छायं ॥ छाया बाहुल्य इति नपुंसकत्वं ॥ तत्र निषण्णा इक्षुच्छायनिषादिन्यः ॥ स्त्रीलिंगपाठे इक्षोः
छायेति विग्रहः । अन्यथा बाहुल्ये नपुंसकत्वप्रसंगात् ॥ शालीन् गोपायंतीति रक्षंतीति शालिगोप्यः सस्यपालिकाः
स्त्रियः । कर्मण्यण् । टिड्ढाणञित्यादिना ङीप् । गोप्तुः रक्षकस्यास्य रघोः गुणोदयः उदयो यस्य तद्गुणोदयं गुणोत्पन्न
मा कुमारं कुमारानारभ्य कथोद्घातः कथारंभो यस्य तत् कुमारे रपि [illegible] मानमित्यर्थः ॥ यशो जगुर्गायंति स्म ॥
अथवा कुमारस्य सतो रघोः याः कथाः इंद्रविजयादयः ततः आरभ्य आकुमारकथं तत्रापि अभिविधावव्य
यीभावः । आकुमारकथमुद्घातो यस्मिन्कर्मणि तत् ॥ गानक्रियाविशेषणमेतत् ॥ स्यादभ्यादानमुद्घात आ
रंभ इत्यमरः ॥ आकुमारकथोद्धूतमिति पाठे ॥ कुमारस्य सतस्तस्य कथाभिश्चरित्रैरुद्धूतं यथा तथा शा
रम्य यशो जगुरिति व्याख्येयं ॥ २० ॥ प्रससादेति ॥ महौजसः कुंभयोनेरगस्त्यस्य ॥ अगस्त्यः कुंभसंभव इत्य
मरः ॥ उदयादंभः प्रससाद प्रसन्नं बभूव ॥ महौजसो रघोरुदयात् अभिभवाशंकि द्विषतां मनः चुक्षुभ
कालुष्यं प्राप । अगस्त्योदये जलानि प्रसीदंतीत्यागमः ॥ २१ ॥ मदेति ॥ मदोदग्रा मदोद्धताः ककुदमस्तीति क
कुद्मंतो महाककुद इत्यर्थः ॥ यवादित्वान्मकारस्य वत्वाभावः ॥ सरितां कूलानि उद्रुजंतीति कूलमुद्रुजाः ॥
उद्विकूलरुजिवहाः इति खश्प्रत्ययः ॥ अरुर्द्विषदित्यादिना नुमागमः ॥ महांतश्च ते उक्षाणो महोक्षाः उपचतुरत्या

© Dharmartha Trust J&K. Digitized by eGangotri

दिनानि पात्तनादकारांतत्वं ॥ लीलाखेलं विलासस्तु तगंतस्य रघोः कुमाद्वतो वपुष्मतः परन्तंजकस्य विक्रमश्री
र्यमनुआपुरन्तुचक्रुः ॥२१॥ प्रसवैरिति ॥ मदस्य वगंधोग्य घ्रांतेर्मदगंधिभिः ॥ उपमानाद्वेतिसमासान्तात्इकारः ॥
सप्तपर्णानां वृक्षाणां ॥ सप्तपर्णो विशालत्वक् शारदो विषमच्छद इत्यमरः ॥ प्रसवैः पुष्पैराहतास्ताडितास्तस्य
रघोर्नागा गजाः ॥ गजेपि नागमातंगावित्यमरः ॥ अस्य यथैव आहत निमित्तया स्पर्द्धयेव सप्तधैव प्रसुस्रुवुः ॥ म
दं ववर्षुः ॥ प्रतिगजगंधाभिमानादिति भावः ॥ करालेय्यां मकुञ्चनेत्राय्यां चमदस्रुतिरितिपालकाव्ये ॥ करा
न्नासारं धारामित्यर्थः ॥२३॥ सरितइति ॥ सरितो गाधाः सुप्रतराः कुर्वतीपथो मार्गान्नवाश्यानकर्द्दमान् शुष्कपं
कान् कुर्वती । संयोगादेरातो धातोर्यण्वतः ॥ इति निष्ठानत्वं ॥ शरत् तस्य रघुः शक्तेरुत्साहशक्तेः प्रथ
3 मं प्राक्यात्रायै दंडयात्रायै चोदयामास प्रेरयामास ॥ प्रभुमंत्रशक्तिसंपन्नस्य तस्य शरत् स्वयमुत्साहमुत्पादया
मासेत्यर्थः ॥२४॥ तस्मा इति ॥ वाजिनामश्वानां निराजनाविधौ नीराजनाख्ये शान्तिकर्मणि सम्यग्विधिवत् हुतो हो
॥३॥ मसमिद्धो वह्निः प्रगतो दक्षिणं प्रदक्षिणं ॥ तिष्ठद्गुप्रभृतित्वादव्ययीभावः ॥ प्रदक्षिणाः शोचिः अर्चिर्ज्वाला ॥ वह्नेर्द्वयो ॥३॥
र्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियामित्यमरः ॥ तस्याव्याजेन हस्तेनेव तस्मै रघवे जयं ददौ ॥ उक्तं च महायात्रायां ॥
दक्षः प्रदक्षिणागतो हुतभुक् नृपस्य धात्रीं ससमुद्ररसनां वशगां करोतीति ॥ वाजिग्रहणं गजादीनामप्युपलक्षणं ।
तेषामपि नीराजनाविधानात् ॥२५॥ स इति ॥ गुप्तौ मूलं स्वनिवासस्थानं प्रत्यंतः प्रांतदुर्गं चयेन सगुप्तमूलप्रत्यंतः
शुद्धपार्ष्णिः रुद्धतपृष्ठशत्रुः सेनया रक्षितपृष्ठदेशो वाश्रयान्वितः शुभदैवान्वितः ॥ अयः शुभावहो विधिरि
त्यमरः ॥ स रघुः षड्विधं मौलभृत्यादिरूपं बलं सैन्यं ॥ मौलं भृत्यं सुहृच्छ्रेणी द्विषदाटविकं बलमित्यमरः ॥ अ

© Dharmartha Trust J&K. Digitized by eGangotri

शायगृहीत्वा दिशां जिगीषया जेतुमिच्छया प्रतस्थे॥२६॥ अवाकिरन्निति॥ वयोवृद्धाः पौरयोषितः प्रयातं गच्छंतं तं रघुं
लाजैराचारलाजैर्मंदरोद्धूतैः एषतैर्बिंदुभिः क्षीरोर्मयः क्षीरसमुद्रोर्मय अच्युतं विष्णुमिवावाकिरन् पर्यच्छिप
न्॥२७॥ स इति॥ प्राचीनबर्हिर्नाम कश्चिन्महाराज इति केचित्॥ इंद्रः पर्जन्यो मघवा वृषा हरिहयः प्राचीनब
र्हिस्तथेति हलायुधः॥ तेन तुल्यः स रघुः अनिलेनानुकूलवायुना उद्धूतैः केतुभिर्ध्वजैः॥ केतुर्द्युतिपताकयोरि
ति विश्वः॥ अहितान् रिपून् तर्जयन् भर्त्सयन्निव॥ तर्जिभर्त्सी रनुदात्तेत्वेपिच छंदोङिल्करणेनानुदात्तत्वनि
मित्तस्यात्मनेपदस्यानित्यत्वज्ञापनात्परस्मैपदमिति वामनः॥ प्रथमं प्राचीं दिशं ययौ॥२८॥ रजोभिरिति॥ किं कुर्व
न् स्यंदनोद्धूतै रजोभिः घनसंनिभैर्वर्णतः क्रियातः प्रमाणतश्च मेघतुल्यैर्गजैश्च ययाक्रमं व्योमभूमाकाशं च भु
वस्तलमिव भूतलं च व्योमेव कुर्वन् ययाविति पूर्वेण संबंधः॥२९॥ प्रतापइति॥ अग्रे प्रतापस्तेजो विशेषः॥ स
प्रभावः प्रतापश्च यत्तेजः कोशदंडजमित्यमरः॥ ततः शब्दः सेनाकलकलः तदनंतरं परागो धूलिः॥ परागश्चंदने धू
लौ गिरौ रवान्नुपरागयोः॥ स्नानीयपुष्परजसोरिति विश्वः॥ पश्चात् रथ्यादिः रथ्याश्वादिकं चतुरंगबलं इतीत्थं चतुः
स्कंधे वचतुर्व्यूहे व॥ स्कंधप्रकांडे कायांसे विज्ञानादिषु पंचसु नृपे समूहे व्यूहे चेति हैमः॥ सा चमूर्ययौ॥ रथ्यानी
कमिति पाठे इति शब्दाध्याहारेणायोज्यं॥३०॥ मरुविति॥ स रघुः शक्तिमत्त्वा समर्थत्वात् मरुपृष्ठानि निर्जलस्थानानि॥
समानौ मरुधन्वानौ वित्यमरः॥ उदंभांसि उद्भूतजलानि चकार नाव्या नौभिस्तार्या नदीः॥ नाव्यं त्रिलिंगं नौतार्यमित्य
मरः॥ नौवयोधर्मविषमूलेत्यादिना यत्प्रत्ययः॥ सुप्रतराः सुखेन तार्याश्चकार॥ विपिनान्यरण्यानि॥ अटव्यरण्यं विपि
नमित्यमरः॥ प्रकाशानि निर्दृष्टशाणि चकार॥ तस्या गम्यं किमपि नास्तीति भावः॥३१॥ स इति॥ महतीं सेनां पूर्वसाग

© Dharmartha Trust J&K. Digitized by eGangotri

रगामिनी कर्षन् सरघुः हरस्य जटाभ्रष्टां गंगां कर्षन् सापि पूर्वसागरगामिनी भगीरथ इव बभौ॥ भगीरथो नाम कश्चि
कपिलदग्धानां सागराणां नप्ता तत्पावनाय हरकिरीटात् गंगां प्रवर्तयिता राजा यत्संबंधात् गंगा च भागीरथीति गीयते॥
॥३२॥ त्याजितैरिति॥ फलं लाभं वृक्षपक्षे फलं प्रसवं च त्याजितैः॥ त्याजेर्ण्यंतात् द्विकर्मकात् प्रधाने कर्मणि क्तः॥ उत्खा
तैः स्वपदात् च्यावितैः अन्यत्रोन्मूलितैः बहुधा नम्रैः रणे जितैः अन्यत्र छिन्नैः नृपैः पादपैः इति नागजस्येव तस्य रघोर्मा
र्गः उल्बणः प्रकाशः आसीत्॥ प्रकाशं प्रकटं स्पष्टमुल्बणं विशदं स्फुटमिति यादवः॥३३॥ पौरस्त्यानिति॥ जयी जयन
शीलः॥ जिदृक्षिविश्रीण्वमेत्यादिना इनिप्रत्ययः॥ सरघुरेवं पुरो भवान् पौरस्त्यान् प्राच्यान्। दक्षिणापश्चात्पुरसस्त्य
गिति त्यक्प्रत्ययः॥ तांस्तान् सर्वानित्यर्थः॥ वीप्सायां द्विरुक्तिः॥ जनपदान् देशान् आक्रामन् तालीवनैः श्यामं महोदधेरु
पकंठमंतिकं प्राप॥३४॥ अनम्राणामिति॥ अनम्राणां॥ कर्मणि षष्ठी॥ समुद्धर्तुः उन्मूलयितुः तस्मात् रघोः सकाशात्॥ भी
त्रार्थानां भयहेतुरिति अपादाने पंचमी॥ सिंधुरयान् नदीवेगादिव सुह्माः सुह्मदेशीयाः॥ सुह्मादयः शब्दा जनपद ॥४॥
॥४॥ वाचकाः क्षत्रियमाचक्षते॥ वैतसीं वेतससंबंधिनीं वृत्तिं आश्रिताः इत्यर्थः॥ आश्रित्य आत्मा अंतरक्षितः॥ अत्र कौटिल्यः॥
बलीयसाऽभियुक्तो दुर्बलः सर्वत्रानुप्रणतो वेतसधर्ममातिष्ठेदिति॥३५॥ वंगानिति॥ नेता नायकः सरघुः नौभिः सा
धनैः उद्यतान् सन्नद्धान् वंगान् राज्ञः तरसा बलेन॥ तरसी बलरंहसी इति यादवः॥ उत्खायेत्यादि गंगायाः स्रोत
सां प्रवाहाणामंतरेषु द्वीपेषु जयस्तंभान् निचखान स्थापितवानित्यर्थः॥३६॥ आपादेति॥ आपादपद्मं द्विपद्म
पर्यंतं प्रणताः अतएव उत्खाताः पूर्वमुद्धृताः अपि प्रतिरोपिताः पश्चात्तस्यापि ताः ते वंगाः कलमा इव शालि
विशेषा इव। शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंसीत्यमरः॥ तेषां पादपद्मं मूलपद्म पर्यंतं॥ पादैर्बुध्न

© Dharmartha Trust J&K. Digitized by eGangotri

तुरीयांशाइति विश्वः॥ भरवात प्रतिरोपिताश्च॥ रघुं फलैर्ह्दैनैः अभ्याजस स्यैः संवर्द्धयामासुः॥ फलं फले थने बीजे निष्प
त्तौ भोगलाभयोः सस्य इति केशवः॥ ३७॥ सइति॥ सरघुर्बेह्वा द्विरदा एव सेतवो यैस्तैः सैन्यैः कपिशां नाम नदीं॥ करमा
मितिके चित्पठंति॥ तीर्त्वा उत्कलैः राज जिद्दर्शितपथः संदर्शितमार्गः स रघुः कलिंगानि मुखं ययौ॥ ३८॥ सइति॥ सर रघो। २
घुर्महेंद्रस्य कुलपर्वत विशेषस्य॥ महेंद्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः॥ विंध्यश्च पारियात्रश्च सप्तात्र कुल
पर्वताइति विष्णुपुराणात्॥ मूर्द्धिनि शृंगे सहेतृप्तापं यंतासारथिः गंभीरवेदिनो द्विरदस्य गजविशेषस्य मूर्द्धि
स्पांनिशितमंकुशमिवन्यवेशयत् निहितवान्॥ त्वग्भेदा [illegible]त्तस्त्वाचां मांसस्य मथनादपि॥ आत्मानं योनजा
नातिसस्यात्गंभीरवेदितितिराजपुत्रीये॥ चिरकालेनयोवेत्ति शिक्षांपरि चितामपि॥ गंभीरवेदी विज्ञेयः सगजोग
जवेदिभिरितिस्मगचमीये॥ ३९॥ प्रतीति॥ गजसाधनः सन् कालिंगः कलिंगानां राजा॥ अंगवंगमगधकलिंगशूरमसा
दणिण्यण्यत्ययः॥ अस्त्रैरायुधैः॥ आयुधं तु प्रहरणं शस्त्रमस्त्रमित्यमरः॥ तं रघुं पक्षाणां गरुतां॥ गरुत्पक्षश्छदाः
पत्रंपतत्रंचतनूरुहमित्यमरः॥ छेदे उद्यतमुद्यमंशाकं शिलावर्षी पर्वतइव प्रतिजग्राह अभियुक्तवान्॥ ४०॥
द्विषामिति॥ काकुत्स्थो रघुस्तत्र महेंद्राद्रौ द्विषां शस्त्रवर्षणं। द्विंदुपक्षाहितामित्यदस्यशास्त्रवत्रशत्रवइत्य
मरः॥ नाराचदुर्दिनं नाराचानां बाणविशेषाणां॥ प्रक्ष्वेडनास्तु नाराचाइत्यमरः॥ दुर्दिनं लक्षणया वर्ष
णामुच्यते विषह्य सहित्वा सत्यथाद्या स्नं मंगलस्नातइव विजयमंगलार्थमभिषिक्तइव जयश्रियं प्रपेदे
प्राप॥ यत्तु सर्वौषधिस्नानं तन्मंगलस्नानमेवं च कालिदासना[illegible]शोताबुर्व्यानाममिति॥ तत्र महेंद्राद्रौ युध्यत
इति योधाः॥ पचाद्यच्॥ रचिताः कल्पिता [illegible] गपत्रदेशाः ये स्तेतथा कृताः संतः नारिके
© Dharmartha Trust J&K. Digitized by eGangotri

लामवंल्लांगलीनां मध्यं। नालिकेरस्तु लांगलीत्यमरः। तांबूलीनां नागवल्लीनां। तांबूलवल्ली तांबूली नागव
ल्यपीत्यमरः। दलैः पत्रैः। पत्रं पलाशं छदनं दलं पर्णं छदः पुमानित्यमरः। पपुः तत्र विजह्रुरित्यर्थः। शात्र
वंयत्राश्च पपुर्जह्रुरित्यर्थः॥४२॥ गृहीतेति॥ धर्मविजयी धर्मार्थं विजयशीलः सन्नृपो रघुः गृहीतश्रीः सोप्र
तिमुक्तश्च तस्य महेंद्रनाथस्य कालिंगस्य श्रियं संपत्तिं। संपत्तिः श्रीश्च लक्ष्मीश्चेत्यमरः। जहार। धर्मार्थमि
तिभावः। मेदिनीं गोत्रां। गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी महीत्यमरः। तु न जहार। शरणागत
वात्सल्यादिति भावः॥४३॥ तत इति॥ ततः प्राचीविजयानंतरं। फलवत्सु गमालिना फलितक्रमुकश्रेणी
5 मता। वीह्यादित्वादिनिप्रत्ययः। घोंटा तु पूगः क्रमुको गूवाकः खपुर इत्यमरः। वेलायाः समुद्रकूलस्य ॥५॥
तटेनोपांते नैवागस्त्येनाचरितामाश्रां दक्षिणां दिशं। दिशस्तु ककुभः काष्ठा आशाश्च हरितश्चेत्यमरः। अ
॥५॥ नाश्रास्यजयः अयत्नसिद्धत्वादप्रार्थनीयजयः सन् ययौ॥ अगस्त्या[illegible]दक्षिणमाशामाश्रित्य नत्र सिस्थि
तः। वरुणस्यात्मजो योगी विंध्यवातापिमर्दनः इति ब्रह्मपुराणे॥४४॥ स इति॥ स रघुर्गजानां दंतिनां। दं
ती दंतावलो हस्ती द्विरदोऽनेकपो द्विपः। मतंगजो गजो नागः इत्यमरः। दानेन मदेन सुगंधिना सुरभिगंधिना।
गंधस्येत्यादिना इकारादेशः। समासांतः। यद्यपि गंधस्येत्वे तदेकांतग्रहणं कर्तव्यमिति नैसर्गिकगंधवि
वक्षायामेवेकारादेशस्तथापि निरंकुशाः कवयः। तथा माघकाव्ये। वकुरयुकक्षदगुच्छसुगंधयः स
ततगास्ततगानगिरोलिभिः। नैषधे च। अपाहि दृष्पायनवारिधारा स्वादुः सुगंधिः स्वदते तुषारेति। नक
र्मं धारयामास वर्षीयद्ध इति द्विनिबंधादिनिप्रत्ययपक्षोपि जघन्य एव। सेनायां समवेताः सैनायां समवे

© Dharmartha Trust J&K. Digitized by eGangotri

तायै सैन्यास्ते सैनिकाश्च तद् इत्यमरः। सेनायां वेति ण्यः प्रत्ययः। सैन्यानां परिभोगेनोपभोगेन कावेरीं नामस
रितं सरितां पत्युः समुद्रस्य। समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिरित्यमरः। शंकनीयामविश्वसनी
यामिवाकरोत्। संभोगलिंगदर्शनाद् इतुरविश्वासोत्र वतीति भावः॥४५॥ बलैरिति। विजिगीषोर्विजेतुमिच्छो
र्गेता ध्वनस्तस्य रघोर्बलैः सैन्यैः। बलं स्थामौर्बलं सैन्यमिति यादवः। मरीचेषु मरीचवनेषु मरीचं लकं कृष्णमू
षणं धर्मपत्तनमित्यमरः। उड्डीनता हारीताः पक्षिविशेषा यासु ताः। तेषां विशेषा हारितो मद्गुः कारंडवः प्ल
व इत्यमरः। मलयाद्रेरुपत्यकाः आसन्नभूमयः। उपाधिभ्यां त्यकन्नासन्नारूढयोरित्यादिना त्यकन् प्रत्ययः। उपत्यका
द्रेरासन्ना भूमिरित्यमरः। अध्युषिताः उपत्यकास्वधिवासितमित्यर्थः॥ पान्च ध्याद्रु सद् इति कमलं॥४६॥ स
संज्जुरिति॥ अश्वैर्घोटकैः। घोटके वीतितुरगतुरंगमाश्वतुरंगमा इत्यमरः। क्षुमाणां एलानां अवलोल
तानां उत्पतिष्णवः उत्पतनशीलाः। अलंकृञित्यादिना इष्णुच् प्रत्ययः। फलरेणवः फलरजांसि। रेणुर्द्व
योः स्त्रियां धूलिः पांसुर्ना न द्वयोः रज इत्यमरः। तुल्यगंधिषु समानगंधेषु॥ सर्वधनीति। वदिनं तौ बकुबु
हिः। मत्तेभानां मत्तकुंजराणां। कुंजरो वारणः करीइभ स्तंबेरमः पद्मीत्यमरः। कटेषु गंडेषु॥ गंडः कट
इत्यमरः॥ ससंज्जुः सक्ताः। गजगंडः करीकरा वित्यमरः॥४७॥ भोगीति॥ चंदनानां चंदनद्रुमाणां भोगिवेष्ट
नमार्गेषु सर्पवेष्टननिम्नेषु समर्पितं संजितं त्रिपदीछेदिनां पादबंधखलछेदकानामपि त्रिपदी पादबंध
नमिति यादवः। करिणां ग्रीवासु त्रवं ग्रैवं कंठबंधनं। ग्रीवाभ्योऽण्च इत्यण्प्रत्ययः। नास्वं सतन्न स्वस्तमभू
त्। घुड्ड्योलु ङीतिपरस्मैपदं तुषादित्वादङ्। अनिदि[illegible]मित्यादिना नकारलोपः॥४८॥ दिक्षीति॥ दक्षि

© Dharmartha Trust J&K. Digitized by eGangotri

णस्यां दिशि रवेरपि तेजो मंदायते मंदं भवति। लोहिता[...]द्यात्क्यष् प्रत्ययः। वा क्यष इत्यात्मनेपदं। भा
नुर्हंसः सहस्रांशुस्तपनः सविता रविरित्यमरः। दक्षिणायने तेजोमांद्यादिति भावः। तस्यामेव दिशि पां
ड्याः पांडूनां जनपदानां राजानः पांड्याः। पांडोर्ड्यण् वक्तव्यः। रघोः प्रतापं तेजः। प्रतापस्तेजसि स्वेदे इति
हेमः। न विषेहिरे न सोढवंतः। सूर्यविजयिनोऽपि विजितवानिति नायकस्य महानुत्कर्षो गम्यते॥४९॥
ताम्रपर्णीति। ते पांड्याः ताम्रपर्ण्या नद्या समेतस्य संगतस्य महोदधेः संबंधि संचितमुक्तासारं मौक्तिकवे
रं। सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिष्वित्यमरः। स्वं स्वकीयं संचितं यश इव तस्मै रघवे निपत्य प्र
6 णिपत्य ददुः। यशसः शुभ्रत्वादौपम्यं ताम्रपर्णीसंगमे मौक्तिकोत्पत्तिरिति प्रसिद्धं॥५०॥ स इति। अस
ह्येति। युग्ममेतत्। असह्यविक्रमः असह्यशक्तिसंप[...] विक्रमः शक्तिसंपदि क्रांतौ चेति हेमः। तटेषु सानुषु आ ६
६ लीनचंदनौ व्याप्तगंधसारद्रुमौ। गंधसारो मलयजो भद्रश्रीश्चंदनोऽस्त्रियामित्यमरः। स्तनपक्षे प्रांतेषु व्या
चंदनानुलेपौ तस्याः दक्षिणस्याः दिशः स्त[...] इव स्थितौ। स्तनौ कुचावित्यमरः। मलयदर्दुरौ नाम
शैलौ यथाकामं यथेच्छं निर्विश्य उपभुज्य। निर्वेशो भृतिभोगयोरित्यमरः। उदकान्यस्य संतीति उदन्वानुदधिः।
उदन्वानुदधौ चेति निपातः। उदन्वानुदधिः सिंधुः सरस्वान्सागरोऽर्णव इत्यमरः। उदन्वता दूरान्मुक्तं दूरतस्त्यक्तं। स्तोकां
तिकदूरार्थकृच्छ्राणि क्तेनेति समासः। पंचम्याः स्तोकादिभ्य इत्यलुक्। स्रस्तांशुकं मेदिन्या नितंबमिव स्थितं सह्यं सह्या
द्रिमलंघयत् जगाम। अतिक्रांतो वा॥५१॥ संप्रति प्रतीचीं दिशमभियियासुस्तामाह॥ तस्येति॥ अपरांतानां पाश्चात्यानां
जयोद्यतै रघुकैः। अपरांतास्तु पाश्चात्या[...]दवः। विसर्पद्दिग्ग[...]ः तस्य परघोरनाकि

© Dharmartha Trust J&K. Digitized by eGangotri

सैन्यैः। अनीकं तु रणेऽस्त्री सैन्ये इति विश्वः। बलं सैन्यं चक्रं चानीकमस्त्रियामित्यमरः। अर्णवः समुद्रः। समुद्रोऽब्धिरकू-
पारः पारावारः सरित्पतिरित्यमरः। रामस्य जामदग्न्यस्यास्त्रेणोत्सारितोऽपसारितोऽपि सह्यलग्नः इवासीत्। सि-
न्धुर्द्वितीयोऽर्णव इव दृश्यत इति भावः॥५२॥ भयेति॥ तेन रघुणा भयेन त्रासेन। दरस्त्रासो भीतिर्भीः साध्व-
सं भयमित्यमरः। उत्सृष्टविभूषाणां परिहृतभूषणानां केरलयोषितामलकेषु चूर्णकुन्तलेषु। अलकाश्चू-
र्णकुन्तला इत्यमरः। चमूरेणुः सेनारजः। ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूरित्यमरः। चूर्णस्य कुङ्कुमादिरज-
सः। चूर्णं क्षोदे द्वारसेन्द्रे इति हेमः। चूर्णानि वासयोगाः स्युरित्यमरः। प्रतिनिधीकृतः। एतेन योषितां पलायनं च
मूलानां च तस्त्रनुधावनं च ध्वन्यते॥५३॥ मरुलेति॥ मरुला नाम केरलदेशेषु काचिन्नदी। मुरचीति केचित्पठन्ति। तस्या
मारुतेनोद्धूतमुत्थापितं केतकरजः तद्योधवारबाणानां रघुभटकञ्चुकानाम्। नरो योधाश्च योद्धार इत्यमरः। कं-
चुको वारबाणोऽस्त्रीत्यमरः। अयत्नपटवासतामयत्नसिद्धवस्त्रवासनाद्रव्यमगमत्। पिष्टातः पटवा-
सक इत्यमरः॥५४॥ अभ्यभूयेति॥ चरतां गच्छतां वाजिनां वाहानाम्। वाजिवाहार्वगन्धर्वहयसैन्धवसप्त-
य इत्यमरः॥ गात्रसिंजितैः गात्रेषु ताड्यमानैः। कर्तरि क्तः। संजितैरिति वा पाठः। सजते एभिस्तात्कर्मणि क्तः।
वर्मभिः कवचैः। अथ तनुत्रं वर्म दंशनं उरश्छदः कङ्कटकोऽजगरः कवचोऽस्त्रियामित्यमरः। पवनेनोद्धूता-
नोकम्पितानां राजतालीवनानां हरणराजविपिनानाम्। विपिनं गहनं काननं वनमित्यमरः। तृणराजाह्वय-
स्ताल इत्यमरः। ध्वनिः स्वनः। ध्वनिध्वनरवस्वना इत्यमरः। अभ्यभूयत तिरस्कृतः॥५५॥ खर्जूरीणामिति॥
णद्रुमवेत्राणाम्॥ खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमा इत्यमरः। स्कन्धेषु प्रकाण्डेषु। अस्त्री प्रका-
ण्डः स्कन्धः स्यान्मूलाच्छाखावधेस्तरोरित्यमरः। [illegible] करिणां मदो द्वारेण दानस्रावेण॥

© Dharmartha Trust J&K. Digitized by eGangotri

मदोदानमित्यमरः। सुगंधिषु। गंधस्येत्यादिनाइकारः। करेणुगंडेषु। गंडः करट इत्यमरः। पुन्नागेभ्यः। पुन्ना
गपुष्पाणि विहाय। ल्यब्लोपे पंचमी। पुन्नागे पुरुषस्तुंगः केसरो देववल्लभ इत्यमरः। शिलीमुखाः अल
यः पेतुः। पतंति स्म। अलिबाणौ शिलीमुखावित्यमरः। तत्तापि सौगंध्यातिशयादिति भावः॥५६॥ अवका
शमिति॥ उदन्वानुदधिः रामाय जामदग्न्यायाभ्यर्थितो याचितः सन् अवकाशं स्थानं ददौ। रघवे तु अपरांत
महीपालव्याजेन करं बलिं ददौ॥ बलिहस्तांशवः कराइत्यमरः। बलिर्दैत्योपहारयोः। करेचामरदंडे च
ग्रहहस्तांशुसंज्ञायोः। लक्ष्मसंकोचे गंधके चेति हैमः। अपरांतानां समुद्रमध्यदेशवासिनां ते ईदृत्ते करे समुद्रदत्तलो
पचारः। करदानं च भीत्या न तु याच्ञयेति रामाद्युद्घोत्कर्षः॥५७॥ मत्तेति॥ तत्र स रघुर्मत्तानां मिभानां मत्त
उंजराणां रदनोत्कीर्णानि दंतक्षतान्येव॥ भावे क्तः। रदना दशना दंता रदा इत्यमरः। व्यक्तानि स्फुटानि। व्यक्तौ
७ मनीषिस्फुटयोरिति हैमः। विक्रमलक्षणानि पराक्रमचिह्नानि विजयवर्णावलिस्थानानि यस्मिन् तत्तथोक्तं। ७
चिह्नं लक्ष्म च लक्षणमित्यमरः। चित्रकूटमेव तद्वैर्जयस्तंभं चकार। गाढप्रकारस्थिकूटः शिरोत्कीर्णवर्णं
स्तंभ इव रघोर्जयस्यापकोपम् इत्यर्थः॥५८॥ पारसीकानिति। ततः स रघुः संयमी योगी तत्वज्ञानेनेंद्रियाख्या
निंद्रियनामकान्। आख्याह्वेऽभिधानं च नामधेयं च नाम चेत्यमरः। रिपून् अरीनिव रिपौ वैरिसपत्नारय
इत्यमरः। पारसीकान् राज्ञो जेतुं स्थलवर्त्मना स्थलीपथया। आन्यलिंगो स्थलं स्थलीत्यमरः। अयनं वर्त्ममा
र्गाध्वपंथान इत्यमरः। प्रतस्थे। न तु नेदिष्ठेनापि जलपथेन समुद्रयानस्यानिष्टत्वादिति भावः॥५९॥ यवनी
ति॥ स रघुः यवनीनां यवनस्त्रीणां। जातेरस्त्रीविषयादिति ङीष्। मुखानि पद्मानीव मुखपद्मानि उप
मितसमासः। वक्त्रास्ये वदनं तुंडमाननं लपनं मुखमित्यमरः। तेषां मधुना मद्येन। मधुक्षीरेजले मद्ये

© Dharmartha Trust J&K. Digitized by eGangotri

उद्गुष्पर सेऽपि चेतिहेमः। योमदो मदरागः। कार्यकारणयोरभेदेन निर्देशः॥ मदो रेत स्यहंकारे मद्ये हर्षेभदानयोः।
कस्तूरिकायां शुक्रे चेति हेमः। तेन सह। कथमिव। अकाले प्रावृड्व्यतिरिक्तकाले जलदोदयः प्रावृष्यपि पद्मविकास
स्याप्रसक्तत्वाद् ब्जानां संबंधिनां बालातपमिव। अब्जहितत्वाद् बुसंबंधित्वं सौरातपस्य॥ ६०॥ संग्राममङ्गनि॥
तस्परयोः अश्वसाधनैर्वाजिसैन्यैः। साधनं सिद्धिसैन्ययोः। रूपाय प्रगमे मेदे निर्हर्तोकारके वधे दापने मृत संस्कारे
त्रणमे गमने धने इति हेमः। पश्चाद्भवैः पाश्चात्यैर्धनैः सह। दक्षिणपश्चात्पुरस्तात्क। सहार्थे तृतीया। शृंगाणां
विकाराः शार्ङ्गाणि धनूंषि तेषां कूजितैः शब्दैः। अथवा शार्ङ्गैः शृंगसंबंधिभिः कूजितैः। शार्ङ्गं विष्णुधनुर्धनुषि इति
हेमः। विहेयाः अनुमेयाः प्रतियोधाः प्रतिभटाः यस्मिन् तस्मिन् रजसि [illegible]तो। रजो रेणुपरागयोः स्त्रीपुष्पे गुण
भेदे चेति हेमः। तुमुलसंग्रामः संकुले युद्धमत्तूत। तुमुलं रणसंकुलं इति हेमः। संकुलं क्लिष्टवचने व्याप्ते चेति
हेमः॥ ६१॥ मद्ध इति॥ सरघुः नद्या पवर्जितैः बाणविश्लेषितैः। नद्या जह्रूकबाणयोरिति हेमः। स्नुही दलफला
न ह्युरतिया दव। श्मश्रुलैः प्रवृद्धश्मश्रुवतामवद्भिः सिध्मादिलाद्द्रप्रत्ययः। तदृद्धो श्मश्रुपुंमुखे वत्स्यमरः। तेषां
पाश्चात्यानां शिरोभिरुत्तमांगैः। उत्तमांगं शिरः शीर्षं मूर्द्धा ना मस्तकोऽस्त्रियामित्यमरः। सरघाभिर्मधुमक्षिका कंटकारि
भिर्व्याप्तैः। सरघा मधुमक्षिकेत्यमरः। क्षुद्राः सरघाः॥ क्षुद्रा व्याघ्री नटी व्यंगा हृतेहतीसरघासु च। चांगेरिकायां रीगली,
हिंस्रायां मक्षिकामात्रवेश्ययोरिति हेमः। क्षुद्राभिः कृतानि क्षौद्राणि मधूनि। क्षौद्रं मधुनि पानीयमित्यमरः। क्षुद्र
भ्रमरवरटरवातपादप्रितिसंज्ञायामप्रत्ययः। तैरपटलैः अवयैः। पटलं तिलके नेत्ररोगे छदिषि संचये। परिकेप
रिवारे चेति हेमः। महीं तस्तार छादयामास॥ ६२॥ अपनीतेति॥ शाहत शिरस्त्र अपनीत शिरस्त्राणा अपसा
रितशीर्षण्याः सन्तः। शीर्षकं शीर्षण्यं शीरस्त्रमित्यमरः। शरणागतंत्राणमेतत्। तेर घुं शरणं यथा। सार्थ रत्र
लोगेहे वधरक्षकयोरपीति हेमः। रघुरेव वरं [illegible] प्रार्थयामास [illegible] सर्वे॥ तथाहि महात्मनां संरंभः संक्षोभः प्रणि

© Dharmartha Trust J&K. Digitized by eGangotri

पातः प्रणतिरेव प्रतीकारो यस्य स हि। महतां परकीयमौद्धत्यमेवासह्यं न तु जीवितमिति भावः॥ ६३॥ विनि
यंत इति॥ तस्य रघोर्योधाः भटाः आस्तीर्णान्यजिनरत्नानि चर्मश्रेष्ठानि। अजिनं चर्म कृत्तिः स्त्रीत्यमरः। रत्नं स्व
जातिश्रेष्ठेप्यानमणाविति हेमः। यासु तासु द्राक्षावलयानां भूमिषु। मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति चे
त्यमरः। मधुभिः द्राक्षामूलप्रकृतिकैर्मद्यैर्विजयश्रमं युद्धखेदं विनयंते स्म अपनीतवंतः। कर्तृस्थे चाशरीरे कर्म
णीत्यात्मनेपदं। लट् स्मे इति भूतार्थे लट्॥ ६४॥ ततइति॥ ततो रघुर्भास्वानिव सूर्य इव शरैर्बाणैः। पृषत्कबाण
विशिखाविजिह्मगखगाशुगाः। कलंबमार्गणशराः पत्री रोप इषुर्द्वयोरित्यमरः। उस्रैः किरणैरिव। किर
णोस्रमयूखांशुगभस्तिघृणिघृष्टय इत्यमरः। उदीच्यानुदग्भवान्नृपान् रसानुदकानीव। रसः स्वादेज
४ लवीर्ये शृंगारादौ विषे द्रवे। बोले रागे देहधातौ तिक्तादौ पारदेपि चेति हेमः। उद्धरिष्यन् कौबेरीं कुबेर
संबंधिनीं दिशमुदीचीं प्रति प्रतस्थे। अनेकेवशब्देनेयमुपमा यथाह दंडी। एकानेकेवशब्दत्वात्सा वाक्या ८
र्थोपमा द्विधेति॥ ६५॥ विनीतेति॥ सिंधुर्नाम काश्मीरदेशेषु कश्चिन्नदविशेषः। देशे नदविशेषेब्धौ सिंधुर्ना स
२ रितः स्त्रियामित्यमरः। सिंधुर्नद्यां गजमदे ऽब्धौ देशाजनभेदयोरिति हेमः। सिंधोस्तीरे विचेष्टनैरंगपरिवर्तनैर्वि
नीताध्वश्रमास्तस्य रघोर्वाजिनोश्वाः लग्नाः कुंकुमकेसराः कुंकुमकुसुमकिंजल्का येषां तान्। यद्वा लग्नकुं
कुमाः केसराः सटा येषां तान्। अथ कुंकुमं काश्मीरजन्माग्निशिखं वरं बाह्लीकपीतनं। रक्तसंकोचपिशुनं धी
रं लोहितचंदनमित्यमरः। सटाजटाकेसरयोरिति हेमः। केसरो नागकेसरे तुरंगसिंहयोः स्कंधकेशेषु बकुलद्रुमे
पुन्नागवृक्षे किंजल्के स्यादिति हेमः। स्कंधान् कायान्। कायो देहः क्लीबपुंसोरित्यमरः। स्कंधः प्रकांडे काये ऽंसे
विज्ञानादिषु पंचसु। नृपे समूहे व्यूहे चेति हेमः। दुधुवुः कंपयंति स्म॥ ६६॥ तत्रेति॥ तत्रोदीच्यादिस्त्रि नष्टेषु

© Dharmartha Trust J&K. Digitized by eGangotri

२फु

ततइति॥ ततोनरेंद्रसूनुः रघुर्निषंगात्तूणीरादसमग्रं यथा तथोद्धृतं सुवर्णपुंखद्युतिभिः रंजिताअंगुलयो येन तत
मिषुं प्रतिसंहरन्निवर्तयन्॥ नाग्रेहरंतं प्रहरेदिति निषेधादितिभावः॥ प्रियंवदतीति प्रियंवदः। प्रियवशेवदः खच्
तिखच्प्रत्ययः॥ अरूर्द्विषित्वादिना मुमागमः॥ सुरेश्वरं प्रत्यवदत्॥ नतु प्राहरदितिभावः॥ ६४॥ अमोच्यमिति॥ हेप्र
भो इंद्र अश्वममोच्यं मन्यसे यदि ततस्तर्हि अनवरदीक्षायां संततदीक्षायां प्रयतः समद्गुरुर्मम पिता विधिनैव कर्मणा
समाप्ते सति क्रतोर्यत्फलं तेन फलेनाशेषेण लक्षेन युक्तोऽस्तु॥ अश्वमेधफललाभे किमश्वेनेति भावः॥ ६५॥
यथेति॥ सदोगतः सदोगृहंगतः त्रिलोचनस्येश्वरस्य एकं ... अष्टानामन्यतमं मूर्तित्वात् दुरासदो मा द्वेषी
ङः प्रापो विशांपतिर्यथाश्रमं वृत्तांतं वार्ता। वृत्तांतः स्यात्प्रकरणे प्रकारे कार्त्स्न्यवार्तयोः इत्यमरः॥ तव संदेशहरो याद्ध
र्तोहरादेवस्थणोति चहेलोके अरूढं तथा विधीयतां॥ ६६॥ तथेति॥ मातलिसारथिरिंद्रः रघोः संबंधिनं कामं मनो
रथं तथेति तथास्त्विति प्रतिश्रुतवान् प्रतिज्ञातवान्। ... सदृवद् श्रुवदिति कसुप्रत्ययः॥ यथागतं ययौ॥ सुद
क्षिणासूनुरपि नातिप्रमना विजयलाभे पशूनाशान्नातीव तुष्टः सन्। नञर्थस्य नशब्देन समासः सुप्सुपेति समासः॥
नृपस्य सदो गृहं प्रतिन्यवर्तत॥ ६७॥ तमिति॥ हरेरिंद्रस्य शासनहारिणा पुरुषेण प्रथमं प्रबोधितो ज्ञापितो
वृत्तांतमिति शेषः॥ प्रजेश्वरो दिलीपः हर्षजडेन हर्षशिशिरेण पाणिना ञ्जलिश्रावणांकितं तस्य रघोरिदं तदी
यं अंगं शरीरं परामृशन्स्पृशन्तं रघुं अभ्यनंदत्॥ ६८॥ इतीति॥ महनीयशासनः पूजनीयाज्ञः क्षितीशइति
महाक्रतूनामश्वमेधानां नवतिरधिकां नवतिं एकोनं शतं आयुषः क्षये सति दिवं स्वर्गमारुरुक्षुरारोढुमि

© Dharmartha Trust J&K. Digitized by eGangotri

हुः सोपानानां परंपरां पंक्तिमिव ततान॥ ६९॥ अथेति॥ अथ विषयेभ्यो व्यावृत्तात्मा निवृत्तचित्तः स दिलीपो यथा
विधि यथाशास्त्रं यूने सूनवे नृपतिककुदं राजचिह्नं॥ ककुद्‌ तु ककुदं श्रेष्ठे वृषांके राजलक्ष्मणीति विश्वः॥
सितातपवारणं श्वेतच्छत्रं दत्वा तया देव्या सुदक्षिणया सह मुनिवनतरोः छायां शिश्रितवान् वानप्रस्थाश्र
10 मं स्वीकृतवानित्यर्थः॥ तथाहि॥ गलितवयसां वृद्धानां मिक्ष्वाकूणामिक्ष्वाकोर्गोत्रापत्यानां॥ तद्राजसंज्ञक
त्वादणो लुक्॥ इदं वनगमनं कुलव्रतं॥ देव्या सहेत्यनेन सपत्नीकवानप्रस्थाश्रम उक्तः॥ तथाच याज्ञवल्क्यः॥
सुतविन्यस्तपत्नीकस्तया वानुगतो वनं॥ वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेदिति॥ हरिणीवृत्तमे
॥१०॥ तत्॥ ७०॥ ॥ ॥ इति श्रीमल्लिनाथसूरिविरचितायां रघुवंशसंजीवन्यां तृतीयः सर्गः समाप्तिंपफाण॥ ॥१०॥
॥ ॥ छ॥ छ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

मूरित्यमरः॥८१॥ तमिति॥ कामरूपाणां नामदेशानामीशाः अत्याखंडलविक्रमम् अतीन्द्रपराक्रमं तं रघुं भिन्नाः स्रवन्म
दाः कटाः गंडा येषां तैर्नागैर्गजैर्भेजुः साधनैर्भेजिरे नागान्दत्वा शरणं गता इत्यर्थः। कीदृशैर्यैर्नागैरन्यान्रघुव्यतिरिक्ता
न्नृपानुपरुरोध। स्मराणामपि स्मरो रघुरिति भावः॥८२॥ कामरूपेति॥ कामरूपेश्वरो हेमपीठस्य कनकासनस्या
धिदेवतां। पीठमासनमित्यमरः। तस्य रघोः पादयोश्चरणयोः छायां। पादः पदंघ्रिश्चरणोऽस्त्रियामित्यमरः। कनकम
यपादपीठव्यापिनीं कांतिं रत्नान्येव पुष्पाणि तेषामुपहारेण समर्पणेनानर्च अर्चयामास॥ उपायनमुपग्राह्यमुप
हारस्तथोपदेत्यमरः॥८३॥ इतीति॥ जिष्णुर्जयनशीलः। ग्लाजिस्थश्च ग्स्नुरिति ग्स्नुप्रत्ययः। स रघुरित्थं दिशो जि
त्वा रथेरुद्धतं रजः छत्रशून्येषु रघोरेकच्छत्रकत्वादिति भावः। राज्ञां मौलिषु किरीटेषु वा धम्मिल्लेषु। अथ मुकुटं किरी
टं पुंनपुंसकमित्यमरः। धम्मिल्लः संयताः कचा इत्यमरः। मौलिः किरीटे धम्मिल्ले चूडाकंकेल्लिमुर्द्धसु इति हेमः। विश्रामयन्
सं कामयन्नित्यर्थः। न्यवर्तत निवृत्तः॥८४॥ स इति॥ स रघुः सर्वस्वं धनं। स्वं निजे धन इति हेमः। दक्षिणा यद्दानं य
स्य तं सर्वस्वदक्षिणं। दक्षिणा द्विकूप्रतिष्ठा यज्ञदानमिति हेमः। विश्वजित्सर्वस्वदक्षिण इति श्रुतेः। विश्वजितं नाम य
ज्ञमाजह्रे कृतवानित्यर्थः। युक्तं चैतदित्याह। सतां साधूनां वारिमुचां मेघानामिवादानमर्जनं विसर्गाय त्यागाय। विस
र्गो विसर्जनीये वर्चे स्मिन् त्यागदानयोरिति हेमः। पात्रविनियोगायेत्यर्थः॥८५॥ सत्रांत इति॥ काकुत्स्थो रघुः सत्रांते
यज्ञांते। सत्रमाच्छादने यज्ञे सदादाने धनेऽपि चेत्यमरः॥ सचिवानाममात्यानां। सचिवो मंत्रकेऽमात्य इति हेमः। स
खा इति सचिवसखः सन्। तेषामत्यंतानुसारेणाद्योतनार्थं राज्ञः सखिलव्यपदेशः। राजाहः सखिभ्यष्टच्। गुर्वीभि
र्महतीभिः। गुरुर्महत्यांगिरसे पित्राद्यौ धर्मदेशके इति हेमः। पुरस्क्रियाभिः पूजाभिः। शमितपराजयेन नयव्यलीकं दुःखं
वैलक्ष्यं वा तद्येषां तान्। दुःखे वैलक्ष्ये व्यलीकमिति यादवः। चिरविरहेणोत्कंठिताः उत्सुकाः अवरोधाः अंतःपुरांगना
येषां तान्राज्ञो पत्यानि राजन्याः क्षत्रियाः तान्। राजश्वशुराद्यदिति ज्ञातौ यत्प्रत्ययः। मूर्द्धाभिषिक्तो राजन्यो बा
हुजः क्षत्रियो विराडित्यमरः। स्वपुरं प्रतिनिवृत्तये प्रतिगमनायानुमनेन अनुज्ञातवान्॥८६॥ तत इति॥ ते राज्ञा नारे

© Dharmartha Trust J&K. Digitized by eGangotri

प्रसादोऽनुग्रहस्तास्य [illegible] गुणाद्द्गतिहेमः २ सर्ग॰ ४

सर्ग ४ ॥ [illegible] ध्वजा पताका वैजयंती स्यात्केतनं ध्वजमस्त्रियामित्यमरः ॥ अशनिर्ह्लादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविरित्यमरः ॥ [illegible] पत्राणि च छत्रं स्यातपत्रमित्यमरः ॥ ध्वजाद्याकारा रेखाइत्यर्थः ॥ तानि चिह्नानि यस्य तत्तथोक्तं ॥ प्रसादे [illegible] [illegible] प्रसन्नेषु काव्यगुणइति हेमः ॥ अनुग्रहे लोवलस्यं प्रसादलत्य सम्राजः सार्वभौमस्य रघोश्चरणयुगं प्रस्थाने प्रयाणसमये याः प्रणतयो नमस्कारास्ताभिः करयोरंगुलिषु मौलिषु केशबंधेषु याः स्रजो माल्यानि तासां च्युतैर्म करंदैः पुष्परसैः मकरंदः पुष्परसइत्यमरः ॥ रेणुभिः परागैश्च परागः सुमनोरजइत्यमरः ॥ गौरं गौरवर्णं च कुः ॥ ॥ इति श्रीपदवाक्यप्रमाणपारावारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरि विरचितायां रघुवंशव्याख्यायां संजीवनीसमाख्यायां चतुर्थः सर्गः समाप्तिंपफाण ॥ ॥ ॥ ॥ ॥ ॥—

नं २६८८ ॥

काव्य
४ रघुवंश
५५

© Dharmartha Trust J&K. Digitized by eGangotri